CC-0. Digitized by eGangotri and MIDF- Delhi

सत्प्रभवं नाटकम्



प्रा. रामहरिदाहालः

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः - अष्टार्विंशतितमं (२८) प्रकाशनम्

सत्प्रभवं नाटकम्

रचनाकारः

प्रा. रामहरिदाहालः

प्रकाशकम्

जयतु संस्कृतम्

नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकस्य नामः	सत्प्रभवं नाटकम्
रचनाकारः	प्रा. रामहरिदाहालः
प्रकाशकः-	जयतु संस्कृतम्, नेपालः ।
प्रकाशनमितिः-	आषाढस्य ११ दिनाङ्के (नेपाले समायोजितस्य एकोनविंशतितमस्य विश्वसंस्कृतसम्मेलनस्य (२०८२।३।१२-१६) शुभावसरे) ।
प्रकाशनप्रतिः -	पञ्चशतम्
सर्वाधिकारः -	रचनाकारे
मूल्यम्-	रूप्यकाणि- ३५०/-
मुद्रणालयः-	किशोर अफसेट प्रेस प्रा.लि.
ISBN :	978-9937-9491-6-3

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्म-राजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं बिभर्त्ति । एवञ्च २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्-छात्रावासस्य वाग्रे स्मारकस्तम्भः स्थापितः ।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम् । अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः । अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ । नैपालिक्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया ।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतमिति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते । एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति । लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति । नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालयेऽन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासा जायममानाः सन्ति । द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते । उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति । संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्यपर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १. पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभवं महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा हरिहरशर्मा अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यसाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. चिकित्सको गोपाल-वैद्यः, किंजल्कः (२०६१ हिमाद्रिमहिमा (काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचारः सानुवादः) ८. प्रा.डा. टीकारामोऽधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम, (काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (कविता), ११ प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च)), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश) १६.आचार्य पूर्णचन्द्रढुङ्गेलः, २०७९, देवाधिदेवमहादेव-श्रीनीलकण्ठमहाकाव्यम् ।

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । (खेमराजकेशवशरणः, तस्य काष्ठमण्डपं समागन्तुमशक्यत्वात् उपाध्यक्षो विष्णुप्रसाददेवकोटा, सचिवो नवराजकट्टेलश्च, देवघट्टं गत्वा सम्मानं समर्पितवन्तौ ।) २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरी), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरी), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरी) च सम्मानिताः । २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसः सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरी), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरी), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः) ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति अस्मत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ ख्रीष्टाब्देऽष्ट्रलियादेशे अष्टादशतमं सम्मेलनं सम्पन्नम्। तत्र सञ्जातेन सम्मेलनेन २०२४ तमे ख्रीष्टाब्दे नेपाले तादृशसम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य सम्पादनायात्र एका संयोजनसमितिश्च सङ्घटिता समासीत्। संस्कृतविश्वविद्यालयेन तद्व्यवस्थापने विलम्बो विहितः। अतः प्रयासान्तरेण २०८२ वैक्रमाब्दस्य आषाढमासस्य १२-१६, (सन् २०२५ जून २६-३०) दिनाङ्के विश्वसंस्कृतसम्मेलनं जायमानमस्ति। अस्य समायोजने जयतु संस्कृतमिति संस्थाया महती भूमिकास्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिर्महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतोऽस्ति।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्योद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकाणां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि सन्ति। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव संस्कृतनाटिकाकौस्तुभनामा रूपकसङ्ग्रहश्च प्रकाशितः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तप्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तप्रदेशेषु (२०७७-२०७८) पञ्चदशदिवससंस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दे सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। षट्सहस्रेण (६०००) जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषा पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ तमेऽङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रभाषासु स्थापितं वर्तते।

यतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते। तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति। रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति। प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति। संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते। पारितोषिकस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया ताः प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

रामहरिदाहालः संस्कृतसाहित्यस्य महान् कविरस्ति अनेन नाटकानि खण्डकाव्यानि, महाकाव्यञ्च लिखितमस्ति । महाकाव्यं प्रकाशनस्य प्रतीक्षायामस्ति, झटिति एव तस्यापि प्रकाशनं भविष्यति । अनेनैव विदुषा जयतु संस्कृतम् नाट्य पुरस्कारोऽपि स्थापितः । द्वयोः काव्योः कृते अनेन जयतु संस्कृतम् पारितोषिकम्(२०७५) प्राप्तः । स चासौ विद्वान् (वि.सं. २०११।४।२४) धादिङजनपदस्य बालकुमारी-लीलानाथदाहालयोः पुत्ररत्नत्वेन समजनि । गृहे एव परम्परायां समधीयानो दाहालः रानीपोखरी संस्कृतमाध्यमिकविद्यालयतः मध्यमापरीक्षां समुत्तीर्य वाल्मीकिविद्यापीठात् साहित्यविषयमवलम्ब्य आचार्यपरीक्षां समुत्तीर्णवान् । अनेन विदुषा धादिङजनपदस्यैव राधिकाज्ञानेन्द्रप्रसादयोः कुक्षिजयः सावित्रीनामिकया कन्यया सह पाणिग्रहणं विहितमासीत् । तयोः सन्ततयः यथा सृजना-प्रभा-प्रतिभा-सुधा--सुजातादाहालाः पुत्र्यः सन्ति चेत् पुत्रः प्रसन्नदाहालो आसीत् स चासौ कालयोगात् (२०८१।१२।२७ दिनाङ्के) दिवङ्गतः । स अमेरिकादेशे एरिजोनाप्रान्ते स्थपति (इन्जिनियर)त्वेन कार्यं प्रकुर्वाण आसीत् । अधुना रुविनाम्नी पुत्रवधूः पर्यावरणस्थपतित्वेन अमेरिकादेशे कार्यं कुर्वाणा अस्ति । तत्रैव दाहालस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधुनिभा नाम्नी एका पौत्री च विलसति। पारिवारिकपरिस्थितिः सामान्यं सुमधुरम्।

तदनु २०३५ वैक्रमाब्दे (भाद्रः १६तः) उपप्रशिक्षकरूपेण वाल्मीकिविद्यापीठे पाठयितुं प्रारब्धवान्। स्वकीयप्रतिभया, परिश्रमेण, प्रशिक्षणकौशल्येन च साहप्राध्यापकः, प्राध्यापको भूत्वा बहूनि वर्षाणि अनेन विदुषा संस्कृतसेवा विहिता। एन विभागाध्यक्षो भूत्वा कदा नेपालसंस्कृतविश्वविद्यालयस्य प्राज्ञिकसमितेः सदस्यो भूत्वा च संस्कृतसेवा व्यधायि। अयं सूरिः महेन्द्रविद्याविभूषणं, शिक्षासेवापुरस्कारः, दीर्घसेवापदकं च लब्धवान्। अस्य संस्कृतसाहित्यसूरेः 'अमरभारतीगौरवम्', (२०७३), 'गतो मदीयो ननु कुत्र देशः' (२०७३) संस्कृतकाव्यद्वयं अधिकृत्य २०७३ वर्षस्य जयतु संस्कृतम् पुरस्कारश्च अस्मै दत्तः। अनेनोदारमनस्विना 'जयतु संस्कृतं बालकुमारी-लीलानाथदाहालनाट्यपुरस्कार'श्च स्थापितः।

अनेन नेपालीभाषायां 'नेवारपानी' (२०५७) 'शान्तिको खोजी' (२०५७), 'सावित्री' (२०५८), इति त्रीणि खण्डकाव्यानि व्यलेखि। संस्कृतभाषाया 'अमरभारतीगौरवम्', 'गतो मदीयो ननु कुत्र देशः' इति द्वे खण्डकाव्ये प्रकाशिते स्तः। एन राधेश्यामभट्टराई वरेण लिखितं हलेसीखण्डकाव्यं संस्कृतभाषायां समच्छन्दसि अनुवादो विहितः। शिवपुराणस्य भर्तृहरिशतकत्रयस्य च नेपालीभाषायामनुवादो विहितः। संस्कृतनाटकेषु आचारिकं, गुरुकुलचर्यं, सत्प्रभवम्, दृष्टिसृष्टिः इति चत्वारिनाटकानि चत्वारि कर्मसिद्धि, शान्तिदूतः, प्रत्यादेषणम्, : शान्तिसंविदम् इति .एकाङ्कनाटकानि च विलिखितानि। एतेषां प्रकाशनं जयतु संस्कृतमिति संस्थया विहितम्। एवञ्च 'अवधेशचरितं महाकाव्यम्' प्रकाशनस्य प्रतीक्षायमस्ति।

अनेन ऋतम्भरा-जयतु संस्कृतं-मधुपर्कगोरखापत्र-कान्तिपुर-भानुप्रवाह-इत्यादिषु पत्रिकाषु च लेखाः प्रकाशिताः। जयतु संस्कृतं संस्थया सम्पादितयां संस्कृतकविगोष्ठ्यां प्रतिवर्षं संस्कृतकविता रचिता, श्राविता च, ताश्च कविताः संस्कृतकवितासङ्ग्रहे प्रकाशिताः।

छात्रजीवतादेव समाजसेवायां संलग्नो दृश्यतेऽयं सूरिः। जयतु संस्कृतं संस्थायाः आजीवनसदस्योऽस्ति। नेपालविश्वहिन्दुपरिषदः, कलङ्कीस्थज्येष्ठनागरिकसमाजस्य च आजीवन सदस्यो वर्तते। अयं कविःपर्वसुधाराभियानस्य परामर्शदाता, कलङ्कीस्थवैदिकसनातनधर्मसंस्थायाश्च परामर्शदाता, धादिङनीलकण्डप्रज्ञाप्रतिष्ठानस्य मानार्थसदस्यः वर्तते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदं नाटकं सर्वदैव सर्वथैव आचारस्य पालनं विधेयमिति विषये लिखितमस्ति । आचारम् अधिकृत्य कृतो ग्रन्थः आचारिकम् इति व्युत्पत्तिः । अतः अत्र नाटके आचार्यलिखितेन स्वल्पमति आचारहीनं अनुशासनहीनं, मर्यादाहीनं कार्यं विहितं, अनुमतिं विना अग्रजस्य उपवनस्य फलभक्षणं विहितम् । तस्य कृते स स्वयं राजसमक्षं दण्डं याचते, दण्डितो भवति च ।

तथैव नाटकानां प्रकाशनाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि । अथ च नाटकस्य अध्ययनं, संशोधनं, समीक्षां च कृतवान् प्रा.डा. नूरापतिपोखेलः । एतस्य भूरिपरिश्रमस्य कृते अस्मै विद्वद्वराय कृतज्ञतामाभारञ्च समर्पयामि । स्वयञ्च कर्मफलम् इति एकविंशति लघुनाटकानि विरचय्य नाट्यसाहित्य विवृद्धये भूरिश्रमः कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः, अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्, अनेनैव विदुषः पौनःपुन्यं निगद्य निगद्य रचनाः सङ्कलिता । एवञ्चास्य सङ्ग्रहस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रेमिणः धन्यवादार्हाः सन्ति । जयतु संस्कृतम् ।

अध्यक्षः

डा. बद्रीपोखेलः

जयतु संस्कृतम्

अनामनगरम्, काष्ठमण्डपम्- ३२ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकचतुष्टयीपर्यालोचनम्

प्रा. नुरापतिपोखरेलः

दृश्यश्रव्यभेदेने द्विधा विभक्तयोः काव्ययोरन्यतमं दृश्यकाव्यम्। तच्च काव्यमभिनयप्रधानत्वादभिनेयकाव्यम्, अनुकर्तर्यनुकार्यरूपारोपणाच्च रूपकपदवाच्यम्। नाटकञ्च रूपकेष्वन्यतमं दृश्यकाव्यम्। विशेषलक्षणं विना रूपकाण्युपरूपकाणि च नाटकवद्भवन्ति। यथा- नाटकं ख्यातवृत्तं भवति चेद् प्रकरणं कल्पितवृत्तमयं भवति। काव्यसामान्यलक्षणेन सह दृश्यकाव्येषु नाट्यशास्त्रप्रतिपादितानां नियमानां पालनमप्यावश्यकम्।.

आधुनिकसमये नाटकपदेनाभिनेयं सकलमपि काव्यं बुध्यते। प्राच्यकाव्यशास्त्रे तदर्थे रूपकपदं व्यवह्रियते। पुनश्चाधुनिकनाटकानि गद्यमयानि, पद्यमयानि, गेयानि वोपलभ्यन्ते, संस्कृतनाटकानि तु गद्यपद्योभयरूपाणि। इत्थं संस्कृतरूपकाण्यान्तरविषयं लक्ष्यीकृत्य वर्गीकृतानि दृश्यन्ते चेदाधुनिकनाटकानि संरचनां लयं च लक्ष्यीकृत्य पूर्णाङ्कमेकाङ्कमिति गद्यनाटकं पद्यनाटकं गेयनाटकञ्चेति द्विधा त्रिधा वा वर्गीकृतानि लभ्यन्ते। संस्कृतरूपकाणान्तु काचिद् भिन्नैव स्वीया सरणी। तामेव सरणीमनुसृत्य वत्सगोत्रीयेण रामहरिदाहालनाम्ना विदुषा गुरुकुलचर्यम्, आचारिकम्, सत्प्रभावम्, दृष्टिसृष्टि चेति चत्वानि नाटकानि प्रणीतानि।

प्रथमं खलु नाटकं गुरुकुलचर्यम्। नाटकेऽस्मिन् षडङ्का विद्यन्ते। जिज्ञासवो वटवः कथं गुरुकुलं प्रवशन्ति, कथं वाभिभावकाः स्वसन्ततिं गुरुकुलं प्रापयन्ति, शिक्षालये गुरुकुले कृतप्रवेशा वटवः कथं वाचारप्रधानां शिक्षामर्जयन्ति, शिक्षार्जनानन्तरं कथञ्च दीक्षिता जायन्त इति गुरुकुलसम्बद्धाः सर्वेऽपि विषया अत्र निरूपिताः सन्ति। देवघंट्टस्थगुरुकुलं मनसि निधाय पौरस्त्यकाव्येषु पुराणादिषु च वर्णितं गुरुकुलमहिमानं स्मारं स्मारं कविरत्र गुरुकुलचर्यां निरूपयति। गुरुकुलरीतेः समग्रतायाः निरूपणं गुरुकुलदेयाचारादिशिक्षायाः प्रतिपादनं च कवेरत्र लक्ष्यम्। अस्मान्नाटकाद्गुरुकुलानां लक्ष्यम्, गुरूणां गुरुता, अन्तेवासिष्वावश्यका नम्रातादयो गुणाश्च प्रकटीभवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयमाचारिकं नाटकं सप्तसु अङ्केषु विभक्तमस्ति। तत्र सप्तमोऽङ्को दृश्यद्वये विभक्तोऽस्ति चेदन्ये सर्वेऽप्यङ्का दृश्यविभागरहिताः। बाहुदानदीतटस्थस्वस्वाश्रमनिवासिनोः स्मृतिशास्त्रकारयोः शङ्खलिखतयोरितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। स्मृतिशास्त्रप्रयोजकयोस्तयोः शङ्खोऽग्रजश्चेल्लिखितोऽनुजः। कदाचिदग्रजाश्रमं प्राप्तो लिखितस्तदनुज्ञां विनैव तदुद्यानस्थमाम्रफलं भक्षयति। ज्ञातवृत्तान्तः शङ्खो लिखितस्य तत्कृत्यं चौर्यं मनुते। दण्डार्हत्वाद् दण्डप्राप्तये तं राज्ञः सुद्युम्नस्य समीपं प्रेषयति। राजधर्मं पालयन् सुद्युम्नस्तस्य पाणिद्वयं छेदयति। दण्डप्राप्त्यनन्तरमग्रजेन सहैव प्रातःकृत्यसम्पादनाय बाहुदां प्राप्तस्य लिखितस्य शङ्खतपःप्रभावेण सूर्यनारायणकृपया च पाणिद्वयं रोहति। आख्यानमिदं महाभारतस्य शान्तिपर्वणि राजधर्मपालनस्याऽऽवश्यकताख्यापनाय प्रसङ्गत उद्धृतमस्ति। इदमेवाख्यानमुपजीव्य दाहालेन स्वप्रतिभया नाटकमिदं प्रणीतम्। आचारस्य महिमप्रदर्शनमेव नाटकनिर्मातुरुद्देश्यम्। एतदर्थमेव नाटकनामाचारिकं विहितम्। सर्वैरेव स्वस्वाचारः पालनीयः। स्मृतिकार एव स्वाचारं न पालयति चेदन्ये कथं पालयेयुरिति स्मृतिकारस्य शङ्खस्य धारणा। पुनश्चोपजीव्ये स्वधर्माचरणेन राज्ञः, दण्डग्रहणेन च लिखतस्य सद्गतिर्निर्दिष्टास्ति।

तृतीयं नाटकं सत्प्रभावम्। आदिकाव्यस्य रामायणस्य निर्मातुर्वाल्मीकेः प्रथितं पूर्ववृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। वाल्मीकीये हि रामायणे वाल्मीकिरात्मानं प्रचेतसो दशमपुत्रत्वेन परिचाययति। आदिकाव्यानन्तरं लिखितेषु कतिपयेषु रामायणेषु काव्येषु च रत्नाकरनाम्ना प्रथितो दस्युरेव देवर्षेर्नारदाद् विपरीताक्षरं रामनाममन्त्रमासाद्य तमेव मन्त्रं जपन् तपसा वाल्मीकित्वमवाप रामायणञ्च रचयामासेति तदितिवृत्तमुपलभ्यते। तदेव प्रथितमितिवृत्तमुपजीव्य प्रणीतमिदं नाटकं सप्तभिरङ्कैः समन्वितमस्ति। सत्सङ्गत्या दुर्जनोऽपि सज्जनो जायत इति प्रतिपादनमेव नाटकस्यास्य लक्ष्यम्। न केवलं साधारणा एव जनाः, परं कदाचारपरायणा अपि जना सत्सङ्गतिप्रभावेण स्वजीवनं सफलीकर्तुं परोपकारं च विदधातुं प्रभवन्तीति वाल्मीकेर्दृष्टान्तेन प्रदर्श्यते।

चतुर्थं दृष्टिसृष्टिनाटकम्। यस्य यादृशी दृष्टिः (धारणा) स तादृशमेव जगत् पश्यतीति शीर्षकतात्पर्यम्। महाभारतप्रमुखचरितानां कौरवपाण्डवानां गुरुकुलाध्ययनकालिकमितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। अत्र षडङ्का

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यन्ते चेदङ्गाश्च विभिन्नेषु दृश्येषु विभक्ताः सन्ति । अत्र सत्पक्षस्य प्रतिनिधिः पाण्डुतनयो युधिष्ठिरः, असत्पक्षस्य प्रतिनिधिर्दुर्योधनः । युधिष्ठिरो भार्तृणां मेलनं कामयते चेद् दुर्योधनः सदैव पाण्डवैः सह वैरं विधत्ते । धर्मात्मजो युधिष्ठिरः स्वदृष्ट्यनुसारं सकलमपि जगत् सद्भिः प्राणिभिः पूर्णं पश्यति चेत् पाण्डवैः सह बद्धवैरो दुर्भावनाकलुषहृदयो दुर्योधनः स्वदृष्ट्यनुसारमेव निखिलमपि भुवनतलं दुर्जनैर्व्याप्तं विलोकयति । न केऽपि पदार्था जना वा स्वभावतो हेया ग्राह्या वा, जनानां दृष्टिरेव तान् हेयान् ग्राह्यान् वा सम्पदयतीति नाटकनिर्मातुस्तात्पर्यम् ।

उल्लिखितानां चतुर्णामेव नाटकानां प्रणेता नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य वाल्मीकिविद्यापीठस्याऽध्यापकचरः प्रा. रामहरिदाहालः । आजीवनमेव कृतसंस्कृतसाहित्याध्यापनेन, सदाचारादिशिक्षाप्रदानेन स्वान्तेवासिनां सन्मार्गप्रदर्शकेन, वाग्देवतासमाराधनैकलक्ष्येण, 'गतो मदीयो ननु कुत्र देशः' इत्यादिकाव्यनिचयनिर्मात्रा, मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्येतिवृत्तमवलम्ब्य 'अवधेशचरितम्' इति संस्कृतभाषानिबद्ध-महाकाव्य-प्रणयनसंलग्नेन लब्धसारस्वतकृपाप्रसादेन समादरणीयेन गुरुणा रामहरिणा प्रणीतानि नाटकानीमानि नूनं काव्यतत्त्वविलसितानि नाट्यशास्त्रमर्यादानिबद्धानि च । इमानि नाटकानि मूलतः पौरस्त्यनाट्यशास्त्रनिर्दिष्टां सरणीमवलब्य प्रणीतानि ।

सर्वेष्वेव नाटकेषु प्रथितमितिवृत्तं विद्यते । प्रस्तावनया आरब्धेषु नाटकेषु सर्वत्र नान्दीपाठः, प्रस्तावनायां निर्दिष्टानां पात्राणामेव प्रयोगः, तत्र प्ररोचनायाः सन्निवेशः, अङ्कान्ते पात्राणां बहिर्गमनम्, नाटकान्ते भरतवाक्यम्, सुखान्तता चेति पौरस्त्यनाट्यशास्त्रप्रतिपादितानि नियमान्यत्र पालितानि सन्ति । अङ्कानां गद्यपद्यमयतापि सर्वत्र दृश्यते । शास्त्रनिर्दिष्टेषु सम्बोधनादिषु, क्रियापदप्रयोगादिषु च सावधानतावलिम्बितास्ति । सूक्ष्मदृष्ट्या विलोकिते पञ्चसन्धीनां प्रयोगोऽपि प्राप्यते । स्त्रीपात्रादिषु प्राकृतभाषायाः प्रयोगस्तु नैवात्रास्ति विहितः । नेपालदेशे प्रणीतेषु नाटकेषु छविलालसूरिप्रभृतीनां कतिपयानामेव नाटककाराणां नाटकेष्वेव प्राकृतभाषायाः प्रयोगः प्राप्यते । नेदानीं प्राकृतभाषाप्रयोगो नाटकेष्वपेक्ष्यत इति परम्परया ज्ञायते । न चैतावता नाट्यशास्त्रनियमानामुल्लङ्घनं जायते । सर्वेषामेव नियमानामक्षरशः पालनन्तु नानिवार्यमिति सन्ध्यङ्गानां सन्निवेशस्तु रसाभिव्यक्त्यपेक्षयैव विधेयः, न शास्त्रनिर्वहणेच्छया विधेय इति व्याहरतानन्दवर्धनेनापि सङ्केतितमेव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौरस्त्यनाट्यशास्त्रमवलम्ब्य प्रणीतेष्वपि रामहरेर्नाटकेष्वाधुनिकनाटकाध्ययनस्य प्रभावोऽपि दृश्यते। अङ्कादौ समयनिर्देशनाद्यागृहस्तस्य प्रमाणम्। अङ्कान्तर्दृश्यानां सन्निवेशोऽप्याधुनिकनाटकाध्ययनजन्यः प्रभाव एव। तेनैवात्र लेखकेन विष्कम्भकप्रवेशकादीनां प्रयोगेऽभिरुचिर्नैव प्रदर्शिता। शास्त्रानुकूलेष्वप्येषु नाटकेषु नाट्यकलायाः पूर्णतः परिष्कारो नानुभूयते, परमिदानीन्तनसंस्कृतनाटकप्रणेतृषु नाटककारः स्पृहणीयः सफलश्च दृश्यते।

नाटककारो रामहरिर्मूलतः शास्त्रीयछन्दोबद्धानां पद्यानां रचयिता। 'जयतु संस्कृतम्' इति संस्थया यदा सर्वेभ्यो विद्वद्भ्यो रूपकानाम् (एकाङ्कानां पूर्णाङ्कानां चाभिनेयकाव्यानाम) प्रणयनाय प्रेरणा दत्ता तदैवानेनापि बहूनि रूपकाणि प्रणीतानि। तेषु 'पुनर्जीवनम्' नवम्यां कक्षायाम्, 'कर्मसिद्धिः' चैकादश्यां कक्षायां पाठ्यांशत्वेन निर्धारिते स्तः। चत्वारि (पूर्णाङ्कानि) नाटकानीदानीमुत्प्रेरकयैव 'जयतु संस्कृतम्' इति संस्थया प्रकाश्यमानानि सन्ति। एतदर्थमियं संस्था, अस्याः संस्थायाः सञ्चालकाः सर्वेऽपि महानुभावा धन्यवादार्हाः। सविश्वासमस्याः संस्थायाः सञ्चालकैर्नाटकावलोकनाय, भूमिकालेखनाय च योऽवसरः प्रदत्तस्तदर्थं ते सर्वेऽपि साधुवादेनाभिन्दनीयाः। अस्याः संस्थाया लक्ष्यपूर्तिः स्यात्, नैपालकसंस्कृतवाङ्मयस्य विकासोऽप्युल्लेखनीयः स्यादित्यहं कामये।

नाटककर्तू रामहरेर्भाषा सरला प्रवाहमयी च विद्यते। सा च सरलता पद्येष्वपि विलसति। अस्मादेव कारणात् पद्येभ्योऽपि गद्यकाव्यादिव सहजतयैवार्थोऽवबुध्यते। लयमेव पुरःकुर्वता लेखकेन कुत्रचिद्धतवृत्ततापि नैवापसारिता। पद्यकाव्यलेखकतयास्य नाटकेषु पद्यानां बाहुल्यं दृश्यते। विशेषेणेषा स्थितिः सत्प्रभावनाटके दृश्यते। राजशेखरप्रणीतानि नाटकान्यपि पद्यबाहुल्यात् श्रव्यकाव्यानीव प्रतीयन्ते। क्वचित् सहजतयाप्येषा स्थितिर्जायते, परं तन्न पाठकहृदयमुद्वेजयति। उपमादीनामलङ्काराणां रमणीयः सन्निवेशो रामहरेः प्रशस्यः पक्षः। काव्यशास्त्रमर्मज्ञतयैवानेन रसभाववक्रोक्तिप्रभृतीनां काव्यतत्त्वानामप्यौचित्यपूर्णः सन्निवेशो विहितोऽस्ति। अभिनेयतां लक्ष्यीकृत्यैव गद्येषु स्थाने स्थाने सन्धीनां प्रयोगोऽपि नैव विहितोऽस्ति। सम्पादनक्रमे स्वल्पपदानां सन्धिर्विहितोऽस्ति। समग्रतया लेखकस्येयमलङ्कृता प्रसादगुणमयी च शैली पाठकमनोरञ्जयितुं क्षमा। नाटकानीमान्यभिनेयानि च सन्ति।

॥इति॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरोवाक्

ध्वनीगुणीभूतव्यङ्ग्यत्वेन द्विधा निर्धारितस्य चमत्कारप्राणभूतस्य वाक्यकदम्बस्य काव्यस्य दृश्यश्रव्यत्वभेदद्वयञ्च कृत्वा चातुर्विध्यं काव्यं निर्धारितमस्ति पौरस्त्यवाङ्मये। वस्तुतो ध्वनेर्गुणीभूतस्य चान्योन्यसङ्करसंसृष्ट्याऽनन्तानन्तभेदेषु भवितुं शक्तेश्चापि चातुर्विध्यं सर्वसम्मतं व्यावहारिकदृष्ट्या। तत्र दृश्यं दर्शनार्हं सामाजिकेषु सद्यः प्रभावसर्जनक्षमतायाः कारणात् प्रथमं परिगणितम्। द्रष्टुं शक्यं दृश्यमिति व्युत्पत्तौ सत्यामपि एतत् पठ्यं, श्रव्यं दृश्यञ्चानुभूयते। पठ्यकाव्यापेक्षया दृश्यकाव्यस्य महत्त्वं प्रथमतश्चर्चितं विश्वनाथेन दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमित्युदीर्य। दृश्ये मानवीयानुभूतिः सुस्पष्टं फलितेव विभाव्यते। समाजस्य वस्तुस्थितेश्चित्रणमभिनयमाध्यमाद् विहितं विलोक्यान्तर्मनसि स्वस्यैव मनः संवेगानां प्रस्तुतिर्भूयमानाऽस्तीत्याकलयति सामाजिकः। दृश्यकाव्यं नृत्यगीतसङ्गीतसंवादानां बाहुल्येन प्रयोगात् सातिशयं प्रीतिदम्। कीर्तिस्तु प्रीत्याविर्भवति। प्रथमस्थानं प्रीतिरेव काव्ये। समाजिकप्रीतिततः, स्वस्यापि प्रीतिः, समाजे स्वस्यापि सत्त्वात्। लोकरञ्जनाय प्रयतमानस्य कवेर्धर्मार्थकामहेतोर्नाट्यविधायाः प्रथममुद्देश्यं समाजस्य प्रीतिरेव भवितुमर्हति। समाजस्योत्थानमेव। तत एव ते आकल्पं जयन्ति जीवन्ति च यशःशरीरेण। ध्वनिकृदाह– जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काव्ये जरामरणजं भयमिति।

नाट्यस्य मूलं वेदा एव– जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि इति भरतवचनमत्र प्रमाणम्। दशरूपककृतोवचनमपि नाट्यस्य वेदमूलकत्वं साधयति। यथा–

उद्धृत्योद्धृत्य सारं यमखिलनिगमानाट्यवेदं विरिञ्चि–
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।

इति निगद्य दशरूपककृता चास्य वेदमूलकत्वं संसाध्य महत्त्वमुपरिकृतम्। यच्च नाट्यं वेदवद् महत्त्वाधयितया नाट्यवेदनाम्ना प्रथितं वर्तते। वैदिकसंवादतो नाट्यजगति संवादसर्जनं स्वाभाविकम्। तच्च पाणिनेः समयादपि पूर्वम्। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ससूत्रोल्लेखनान्नाट्यसूत्रप्रणयनस्य तन्माध्यमेन नाट्यकलायाः शुभारभणस्य च दर्शनाद् विद्वैषा प्राक्तनी। रामायण–महाभारतकालेषु राजवर्गेण नृत्याभिननयानामायोजनं मुहुर्मुहुर्विधीयमानमासीदिति तत्तत्समयवद्धग्रन्था अत्र प्रमाणभूताः सन्ति। भाससौमिलककालिदासाश्वघोषादीनां समयतः प्रभावशालितया नाटकनाटिकाः सृष्टा अलभ्यन्ते। नाटकान्तं कवित्वम्, आनन्दनिष्यन्दिषु रूपकेषु काव्येषु नाटकं रम्यम्, चमत्कारैकप्राणा रसाः इत्यादिसूक्तानि नाट्यविधायाः सर्वोपरिमहत्त्वं सूचयन्ति।

नैपालकपरम्परायां नाट्यविधा

इन्द्रयात्राया अवसरे दिनाष्टकं यावद् राक्षसनृत्यम् (लाखेनाच) कुमारीभैरवरथयोः परिक्रमणं विर्ष्णोदशानां प्रमुखावताराणामभिनयप्रदर्शनमेवामादीनि सांस्कृतिकप्रदर्शनानि प्रदर्श्य नाट्यविधायाः संरक्षणं काष्ठमण्डपोपत्यकावासिभिर्विहितं दृश्यते। यक्षमल्ल–रणमल्ल–जगत्ज्योतिर्मल्ल–भूपतीन्द्रमल्लप्रभृतयो मल्लराजाः संस्कृते नाटकानि विलिख्य प्रदर्श्य च संस्कृतसाहित्यस्योत्थाने महद् योगं दत्तवन्त इति नास्त्यविदितं विदुषाम्। इदानीं प्रदर्श्यमानानि चलचित्राण्यपि नाटकस्यैव रूपान्तराणि केवलं तत्र वैद्युतप्रविधिः प्रयुक्तोऽस्ति येन दृश्यानि विस्मयावहानि सम्पत्स्यन्ते। अतः कथयितुं शक्यते यद् नाट्यविधा सार्वकालिकी अमरविधाऽस्ति मनस्तोषिणी। इदानीमपि सततं नाटकानि प्रदर्शितानि दृश्यन्ते प्रेक्षालयेष्वन्यत्र च। तत्र सांस्कृतिकसंस्थान–प्रज्ञाप्रतिष्ठानेऽग्रगण्ये। सडकनाटकाभिधान्यपि प्रदर्श्यमानानि सन्तीति नाट्यस्य सर्वोपरिता सिद्ध्यति।

नाट्यस्य सर्वोपरिताया आधारः

क) समाजस्याचरवेशभाषासंस्कृतिव्यवहाराणां यथार्थतया चित्रणम् = अवस्थानुकारः।

ख) गीतनृत्यसङ्गीतानां प्रयोगादधिकमनोरञ्जनकता।

ग) मञ्चे संवादस्य रुचिकरप्रस्तुत्या स्वीयकथनमुदीरितमिव सन्तोषः।

घ) तात्कालिकोद्योगवीरता–समाजोत्थान–युद्ध–शान्त्यादीनामुल्लेखनादितिहासज्ञानेन साकं स्वसम्पतायां गर्वानुभूतिः।

ङ) भयकोपहर्षोत्साह-करुणाविस्मयादीनांमानवीयमनःसंवेगानां कमनीय-काव्यामाध्यमात् प्रस्फुटीकरणम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च) विभावादीनां साधरणीकरणाद् व्यक्तित्वक्षमतादीनां सामञ्जस्येन सार्वकालिकतया, सार्वजनीनतया च घटनानामन्तर्मनसि सञ्चरणात् सुखदुःखतः परस्यालौकिकानन्दस्य सततमनुभवनम् ।

छ) आनन्दस्य न जातु विच्छेदः ।

ज) अभिनयदर्शनानुपदमेव झटिति परानन्दप्राप्तिः ।

झ) राष्ट्रसेवा–परोपकारिता–दुर्भावनात्याग–सुभवावृद्धिरित्यादिबोधः ।

एवमेवं बहुश आधारा लभ्यन्ते नाट्यस्य सार्वजनीनसार्व-कालिकानन्दप्राप्तौ ।

नाटकरचनाया उद्देश्यम्

शिक्षायां गुरुकुलीयानुशासनपद्धतिर्निंतरामुपयुक्ता दृश्यते । तत्र च विशेषतो माध्यमिकशिक्षायाम् । गुरुकुलीयापद्धतौ प्रवर्तितानां प्रातः शय्यात्यादारभ्य शौचस्नानजपसम्पादनपूर्वकमध्ययनतत्परतायाः शिष्यस्य गुरुजनेष्वादरस्य गुरोः शिष्यवर्गे स्नेहस्य भोजनशुद्धतायाः मनोयोगपूर्वकं पठनपाठनयोः, वादविवादसाहित्यिकप्रतियोगितयोः, क्रीडायाश्च समयबद्धतयाऽऽयोजनस्येति क्रियाकलापानां संस्थातगतविद्यालयेषु सामुदयिकविद्यालयेषु च समावेशनमवश्यमपि शिक्षायाः स्तरविकासाय हितकरं सेत्स्यतीति द्योतनाय गुरुकुलचर्यमिति पूर्णाङ्कीयं रूपकमुपस्थापितं वर्तते । एवञ्च समाजे, प्रशासने च वर्धमानामुच्छृङ्खलप्रवृत्तिं लक्ष्यीकृत्य प्रवृत्तिरेषा महती हानिकरी व्यक्तिराष्ट्रसमाजानां कृते इति प्रदर्शनमाचारिकरूपकस्योद्देश्यम् । अग्रजस्य वाटिकायां फलितमाम्रफलं भ्रात्रा भक्षितम्, भक्षणात् प्रागनुमतिर्न गृहीतेति दोषे भ्रातुर्भुजयुगलकर्तनं कारयित्वाऽग्रजेन दण्डो दापित इति घटना कियती निर्दयात्मिकेति चिन्त्यते । कीदृशोऽग्रजोऽस्ति यो हि भ्रातरं कठोरातिकठोरं दण्डं दापयति स्वल्पतरापराधे इति । परमत्र दण्डे कठोरतया परिचालिते सत्येव समाजे सुव्यवस्था स्थिरायते इत्यपि न विस्मर्तव्यं भवति । पुरा यथा निष्पक्षतया राजपुरुषात् सर्वसाधारणजनपर्यन्तं समानो दण्डः प्रदीयते स्म, येन समाजे सुव्यवस्था स्थापिताऽसीत् । इदानीं मानवाधिकारः, वाक्स्वतन्त्रता, नैसर्गिकाधिकारश्चेति नामसु यथाविधा उच्छृङ्खलगतिविधयो जायमानाः सन्ति । तत्र प्रमुखकारणं दण्डहीनता, उत पूर्वदण्डस्याप्रदानमेव । दण्डे पुस्कारे च पक्षपातो यत्र तद् राज्यं दुर्बलायते । राज्यं प्रति जनतायाः संरक्षकत्वविश्वासश्छिद्यते । तथा माऽभूदिति सन्देशमाचारिकरूपकेण प्रवाहयितुमिच्छति रूपककृत् । सत्प्रभावमित्यत्र सत्सङ्गतेर्महत्त्वं चर्चितम् । सत्सङ्गतिः कथय किं न करोति पुंसामितिवद् देवर्षेः क्षणिकसम्पर्कात् प्रथिततरो दस्युरपि ब्रह्मर्षित्वं प्राप । दृश्यन्ते च सत्सङ्गत्याः परमपदभाजो ध्रुवबलिप्रह्लादादयः । तत्र दस्योर्ब्रह्मर्षित्वप्राप्तौ नेपालावनौ तपश्चरणमपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमाधारः। यत एषावनिस्तयोयोगततन्त्रमन्त्राणामाधारस्थलम्। व्यक्तेरारभ्य समाजस्ततः समग्रराष्ट्रं सदाचरणात् प्रभावितं विकसितञ्च भवति चेत् कदाचरणाद् विनष्टम्। एतत् प्रदर्शनं सत्प्रभावानाटकस्योद्देश्यम्। दृष्टिसृष्टिनाटके दृष्ट्यनुसारेण सृष्टिर्भवति, सद्विचारेण सभ्यतासृष्टिः, कुविचारेण सम्पताक्षयश्चेति प्रदर्शनपूर्वकं परहितसम्पादनायानुकूलचिन्तनाय च प्रेरितं वेविद्यते।

साहित्यस्य पौरस्त्यमान्यतामाधृत्य नाटककृता नाटकानि लिखितानि सन्ति। मान्यतेयमास्माकीना सम्पत् पद्धतिश्च। यथासम्भवं नाटकेषु तत्परिपालितमित्यसौ मनुते। नाटकानि शिक्षाप्रदात्युद्देश्यमूलकानि च सन्तीति असौ विभावयति। सन्दर्भेऽस्मिन्नुचितपरामर्शाः प्राप्स्यन्त एवेत्यसौ विश्वसिति।

एतदीयनाटकचतुष्टयस्याध्ययनं, संशोधनं, समीक्षाञ्च भूरिश्रमेण कृतवते प्राध्यापकवराय नुरापतिपोखरेलमहाभागाय सविशेषं कृतज्ञतां व्याहरामि। नाटकलेखनाय मुहुर्मुहुः प्रेरयन् संस्कृतनेपालीसाहित्यसर्जने लब्धाधिकारो जयतु संस्कृतमिति संस्थायाः सदस्यसचिवः प्राध्यापको डा.नवराजकट्टेलश्च धन्यवादार्होऽस्ति, अनेन संस्कृतरचनायां विधीयमानां प्रेरणां न जातुचिदपि विस्मरति चेतः।

जयतु संस्कृतमिति संस्था संस्कृतप्रशिक्षण–संस्कृत–सम्भाषण–कविगोष्ठीसञ्चालन– नाटकमञ्चन–कृतिप्रकाशनादौ चिराय सततं संलग्ना जायमानास्तीति संस्कृतवाङ्मयसेविनां प्रमोदावाहः पक्षः। अनया संस्थया नेदीयसि समये लघुनाटकानि वृहदाकारकाणि नाटकानि च प्रकाश्यमानानि सन्तीति बोधनान्तरं बृहदाकारं नाटकचतुष्टयं प्रस्तुतमस्ति तत्परतामालक्ष्य जयतु संस्कृतं संस्थायै तत्रानवरतं कार्यरतेभ्यः अध्यक्षोपाध्यक्षसदस्यसचिवेभ्योऽन्येभ्यः सदस्येभ्यश्च भूरिशः साधुवादान् व्याहृत्येत्यादानीं स्ववचः संक्षिपामि।

प्रा. रामहरिदाहालः

दिनाङ्काः २०८१/१२/चैत्रशुक्लद्वादशी

कलङ्की, काष्ठमण्डपः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्प्रभवं नाटकम्

पात्रपरिचय :

देवर्षिः - नारदनामा ब्रह्मपुत्रः ।
व्याधः - रत्नाकरनामा शाकुनिकः ।
व्याधवधूः - व्याधस्य भार्या ।
बालाः - व्याधस्य पुत्राः ।
ब्रह्मा - नारदपिता सृष्टिकर्ता ।
वाल्मीकिः - तपस्सिद्धो वाल्मीकिनामा मुनिः ।
ब्रह्मचारी - ब्रह्मचर्यव्रतधारी वाल्मीकिशिष्यः ।
ब्रम्हचारिवटवः - ब्रम्हचर्यरता वटवः ।
शिवः - पाञ्चायतनदेवतानां प्रमुखो देवः ।
वटवः - बाल्मीकेराश्रमेऽध्ययनरताः स्वल्पवयसश्छात्राः ।

अथ प्रथमोऽङ्कः

आसिच्य गीतामृततोयराशिं
संसारदावाकुलितान् नरान् यः ।
विमोच्य स्वस्थानकरोच्चिराय
भूयात् स वैद्यो भवतां हिताय ॥

सूत्रधारः- अलं विस्तरेण। (नेपथ्याभिमुखं निरीक्ष्य) आर्ये ! यदि नेपथ्यविधानं पर्यवसितं तदिहागम्यताम् ।

नटी- (प्रविश्य) आर्यपुत्र ! इयमस्मि । आज्ञापयत्वार्यः, किं प्रपूरणीयम् ?

सूत्रधारः- आर्ये ! एषा सोमवंशावतंसस्य चक्रवर्तिनोऽजातशत्रोर्युधिष्ठिरस्य रसभाववित् परिषद् । परिषदमिमां तोषयितुमस्माभिः नव्यनाटकमभिनेतव्यम् ।

नटी- आर्यपुत्र ! बृहत्कायं मध्यमकायं वा किं विषयकमिदं नाटकम् !

सूत्रधारः- वत्सगोत्रीयकवे रामहरिदाहालस्य सत्प्रभावमित्यभिदं चरित्राधायकं सन्मार्गप्रदर्शकं सामयिकञ्च मध्यमकायं नाटकमस्ति ।

नटी- किमिदं नाटकमस्मिन् प्रेक्षालये अभिनेतुमुपयुक्तमस्ति ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रधारः- आम्, नाटकमिदं प्रदर्शनायोपयुक्तमस्ति। आर्ये ! इदानीन्तनः समाजो विविधविषयेषु सक्तः। एष धैर्येण दीर्घं कालं कुत्रापि यापयितुं नेच्छति। अतः स्वल्पावधावेव मनस्तोषायास्य रूपकस्य प्रदर्शनम् उपयुक्तं सेत्स्यति। अनेनैव नाटकेन राजपरिषदियम् आराधयितव्या।

नटी- साधु विचारितं भवता।

सूत्रधारः- आर्ये ! परिषदमिमामाराधयितुं गीतिमेकां श्रावय।

नटी- आर्यपुत्र ! कतमं विषयमवलम्ब्य गायानि ?

सूत्रधारः- सत्सङ्गस्य प्रभावमधिकृत्य गीयताम्। महाराजः अजातशत्रुः स्वयमपि सत्सङ्गस्य प्रभावमभिजानाति।

नटी- भवति (गायति)

परहिताय ये सततं
सर्वात्मना रताः सन्ति धरायाम्।
रविरिव घन इव वा ते
जयन्त्याकल्पमिहामुत्र ॥

सूत्रधारः- अयि भूतार्थमुक्तम्। सज्जनाः खलु प्राणिमात्रस्य अभ्युन्नतेर्हेतवः। तथा हि-

प्राप्नोति पुण्यैर्बहुभिः सुसञ्चितैः
सुदिष्टभागी जन एव सज्जनम्।
निदर्शनार्थं सखि ! पश्य साम्प्रतं
बभूव दस्युर्मुनिवर्गभूषणम् ॥

(इति निष्क्रान्ताः सर्वे)

(इति प्रस्तावना)

प्रथमं दृश्यम्

पूर्वाह्णः। एकान्तवनम्।

(ततः प्रविशति धनुर्बाणधरो भिल्लाकृतिर्भीषणकायो रत्नाकरनामा युवव्याधः। स वने इतस्ततोऽवलुण्ठनाय पोटलिकावाहान् पान्थान् निरीक्षते।)

व्याधः- अधुना यावदद्य नैकोऽपि मिलितः पान्थः। यमवलुण्ठ्य परिवारं पुष्णानि। तथा हि -

विना धनं खाद्यपदार्थजातं
नैवाऽऽप्यतेऽतो धनमर्जनीयम्।
पिचण्डपुष्ट्यै परिवारभृत्यै
यतस्ततो वित्तमुपार्जितव्यम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्तर्ज्य पान्थानथवा निपात्य
वित्तञ्च वासः सहसा विलुण्ठ्य ।
बिभर्मि दारान् सुतमित्रबन्धून्
वित्तैर्विना किं भवतीह सत्यम् ॥

(इतस्ततो परिभ्रमति । अव्यक्तध्वनिं शृणोति, साभिनयं नटति)

व्याधः- गृहे सञ्चितमन्नजातं समाप्तम् । क्रयणाय नास्ति धनम् । अद्य किञ्चिन्न प्राप्य गृहं गन्तुं नोत्सहे । कटुभाषिण्या भार्याया वाक्ताडनं कियन्मात्रं सहै । शिशवः निर्दुष्टाः, ते पोषणीयाः सन्त्यवश्यम् । (निपुणं निरीक्ष्य) आः कश्चन काषयावासा विपञ्चीं रणयन् अत्रैवागच्छन्निति विभावयामि । भवतु सावधानं तिष्ठामि । (वृक्षान्तरितो भूत्वा तिष्ठति) (अत्रान्तरे महतीं रणयन् नारायणेति ध्वनिमुच्चारयन् देवर्षिर्नारदः प्रविशति)

देवर्षिः- नारायण ! नारायण ! भगवन् ! भगवतो दयालुता वाचामगोचरा । अहो ! भगवतो नाम्नि कियान् आनन्दोऽस्ति ।

पापौघदावानलशोषकाणि
नामानि हृत्तापहराणि विष्णोः ।
जपन् परां निर्वृतिमेति चेतो
लक्ष्मीशनाम्ना न हि कोऽस्ति मुक्तः ॥
नामानि विष्णोर्मधुराक्षराणि
जप्तुश्च स्मर्तुर्मलनाशकानि ।
तृष्णाविनाशीनि सुखावहानि
जपन् सहर्षं भुवने चरामि ॥

व्याधः- (बहिरागत्य) कोऽसौ पान्थः ? यो हि मह्यं वित्तादिकमप्रदाय मार्गमतिक्रामति ?

देवर्षिः- भो वनेचर ! एष यतिस्तीर्थयात्रायै मार्गमिममतिक्रान्तुमिच्छति ।

व्याधः- पान्थ ! एतद् मम वनम् । ऋते शरीरं सर्वमन्यद् अर्पयित्वैव त्वमितः प्रस्थातुं प्रभवसि । मदादेशे प्रतिहते प्राणैर्वियुक्तो भविष्यसि ।

देवर्षिः- (सस्मितम्) वनेचर ! अयमस्ति एको यतिः । अस्य पार्श्वे परिधानायैकं धौतं वादनाय विपञ्ची च वर्तेते । यद्यसौ धौतं ददाति तदा निर्वस्त्रो भवति । अपि त्वं निर्वस्त्रममुं द्रष्टुमिच्छसि ? विपञ्चीं दद्याच्चेत् त्वमिमां क्वणयितुं न जानासि । अनया उदरपूतिर्न भवति ।

व्याधः- विपञ्चीं देहि । इमां नीरागं वादयित्वापि बालास्तुष्यन्ति ।

देवर्षिः- (साभिनयम्) एवं चेद् विपञ्चीं गृहाण । एषा महोपयोगिनी विपञ्ची महतीनाम्नी, अतो विविधाः स-रि-ग-म-प-ध-नि इति स्वराः चलां अचलाश्च उद्भवन्ति । एतेषां स्वराणाम् आरोहणावरोहणे मूर्च्छनेति गद्यते । यथा हि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशदश्रुतिकलाविद् वादयित्वा विपञ्चीं
रचयति स्वरजातं मूर्च्छना ग्रामरागान् ।
हृदयतलगतास्ते ह्लादयन्त्येव जन्तून्
जगति ननु भवेत् को यो न रागैर्न मत्तः ॥
मुहुर्हासयित्वा मुहुर्मूर्च्छयित्वा
मुहुर्नर्तयित्वाऽथवा रोदयित्वा ।
जनान् मोदयद् भाति सङ्गीतकं भो
क्षितौ गीतवाद्यादिभिः को न तुष्टः ॥

(नमति) भो विपञ्चि ! भवतीम् अभिवादये । गच्छ वनेचरपार्श्वम् । (विपञ्चीं ददाति)

व्याधः- (विपञ्चीं गृह्णन्) सम्प्रति यथेच्छं देशं गन्तुं प्रभवसि ।

देवर्षिः- गच्छामि, तत्पूर्वं किञ्चित् पृच्छामि ।

व्याधः- शीघ्रं पृच्छ । किं पृच्छसि ? मम समयो नास्ति । मया धनार्थम् अन्यः पान्थः अन्वेषणीयोऽस्ति । वीणया किङ्करणीयम् ! त्वत्पार्श्वादन्यत् किञ्चिन्न प्राप्तम् ।

देवर्षिः- वनेचर ! त्वं सन्तर्ज्य, अवलुण्ठ्य च निरपराधान् प्राणिनः किं पीडयसि ! त्वया अनागसः प्राणिनो लुण्ठिता घातिताश्च सन्ति । इदं महत् पापम् । एवंविधानि पापकर्माणि पापिनं नरकं पातयन्ति ।

व्याधः- यते ! नरकस्य चर्चां कृत्वा मां न भीषय । पान्थान् अवलुण्ठ्य घातयित्वा वा मया परिवारजनाः पालनीया एव । इदानीं मम व्यसनं पान्थानां विलुण्ठनमेव वर्तते । अस्मात् पृथक् किमपि न जाने ।

देवर्षिः- (सस्मितं नटन्) भ्रातः ! वनेचर ! येषां परिवारजनानां भरणाय त्वं प्रत्यहं पापं करोषि । ते तव पापफले सहभागिनो भवन्ति न वेति सम्बन्धे अपि कदाचित् त्वया पृष्टम् ?

व्याधः- अत्र किं पृच्छेयम् ? कथं ते सहभागिनो न भवन्ति ?

देवर्षिः- किमत्र त्वं विश्वसिसि ?

व्याधः- कथं न विश्वसिमि ?

देवर्षिः- विना प्रश्नेन विमर्शनेन वा कथं विश्वसिसि ! वारमेकं गत्वा पृच्छ परिवारजनान् ।

व्याधः- मां गृहं सम्प्रेष्य पलायितुमिच्छसि किम् ?

देवर्षिः- मा बिभेः । अहं न पलाये, विश्वासो नास्ति चेन्मां तरुमूले वद्ध्वा याहि ।

व्याधः- (क्षणं विचिन्त्य) भवति, तथा । (लतावितानेन देवर्षिं बध्नाति).

(निष्क्रान्तः)

(इति प्रथमं दृश्यम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

समयो मध्याह्णः

(व्याधस्य पर्णशाला। छद्यां शुष्कमांसखण्डा लम्बिताः सन्ति। गृहाभ्यन्तरे धूलिधूसरितायां भूमौ कतिचित् अशोधितपाचनभाण्डानि, जलाधानपात्राणि च विकीर्णानि वर्तन्ते। देहल्याम् अग्रे स्थण्डिलभूमौ व्याधवधूः बल्वजतृणैः कटं निर्मीयमाणाऽस्ति। प्राङ्गणे बालाः दूरं विलोकयन्तः पितुरागनं प्रतीक्ष्यमाणाः सन्ति।

बालाः- (पितरं विलोक्य हर्षेण हस्तौ पादौ उत्फाल्य च) पिता आगतः! पिता आगतः!

व्याधः- यूयं किं विलोकयथ। मया किमपि न प्राप्तम्। किमपि नानीतञ्च।

व्याधवधूः- बाला बुभुक्षया व्याकुलाः सन्ति। अहमपि बुभुक्षिता। त्वं किमपि नानीय कथम् आगतवानसि! पुनर्गच्छ वनं ग्रामान्तरं वा, ततः किञ्चिद् असनजातं गृहीत्वैवागच्छ।

बालाः- (परिवेष्ट्य) पितः! वयं बुभुक्षया शिथिलायिताः स्म। माता किमपि न ददाति, केवलं नास्तीति ब्रवीति।

व्याधवधूः- किं कथयानि, गृहे नास्ति खाद्यजातम्। भूत्वापि न दत्तमिति बाला मन्यन्ते। इमे गृहावस्थां नैव जानन्ति। (रोषेण पतिं विलोकयति)

व्याधः- (ईषद् रोषं प्रकटय्य) अद्य आदिवसं किमपि असनजातं नासादितम्। पोटलिकावाहाः पथिकाः, सशब्दं चरन्तो वन्यपशवश्च न दृष्टाः। अत एव रिक्तहस्त आगतोऽस्मि।

व्याधवधूः- रिक्तहस्तस्य किं प्रयोजनम्?

व्याधः- (सरोषं तारस्वरेण भर्त्सयन्निव) किं रिक्तहस्तो गृहमागन्तुं न शक्नोमि? सर्वदैव भरितहस्तः कथं वा भवामि! धिक् धिक्! कीदृशी समाजस्य स्वार्थता। तथा हि-

सदा स्नेहदृष्ट्या तथा स्वत्वबुद्ध्या
सदा भोज्यपानादिभिर्वर्द्धिताश्च।
कदाचिन्न दद्यामिमे पुत्रदाराः
परः कश्चनोऽस्तीतिवद् मन्वते धिक्॥

व्याधवधूः- (नटति) भो, अलम्, अधिकं मा लप। त्वं सुखदाता वयमेव दुःखदायिनः। मम भाग्यमेवेदृशम् -

बाल्ये क्रीडावयसि पितरौ भ्रातृबन्धून् विहाय
मुग्धा याताऽहमिह सदने कार्यभारं विवोढुम्।
दासी भूत्वा खर इव विभिन्नानि कार्याणि कुर्वे
स्नेहं पत्युस्तदपि न लभै योषितो धिग् जनिं वै॥ (रोदिति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याधः- (निकटमेत्य सान्त्वं वचो व्याहरन्) भार्ये ! तथा मा भण। सर्वे स्वकर्मानुसारेणैव जीवन्ति। कश्चन गृहान् त्यक्त्वा, सुतबन्धून् विहाय सुखी भवितुं न शक्नोति। कश्चिद् अकिञ्चनोऽपि एकाक्यपि सुखी भवति। अपरः परिवारमध्ये स्थित्वापि धनमर्जयित्वापि दुःखी जायते। अधुना केवलं त्वमेव दुःखिनी न, अहमपि दुःखी अस्मि। बालाश्च दुःखिनः सन्ति।

व्याधवधूः- (रोदनं शिथिलीकृत्य गद्गदस्वरेण) मम कथनेन भवान् दुःखी न भवतु। अन्नस्याभावे जलमात्रं पीत्वाऽपि जीविष्यामः। सुखदुःखञ्च सहैव सहर्षं भुञ्जामः।

व्याधः- भो भार्ये ! अङ्ग ! बालकाः शृणुत। मया युष्माकञ्च पालनार्थं बहवः पान्था अवलुण्ठिताः। गृहाणि भङ्क्त्वा गृहस्थानां सुवर्णान्नभाण्डादीन्यपि चोरितानि।

व्याधवधूः- वृत्तये एतत् करणीयमेवाऽऽसीत्। भवानधुना किमर्थं चिन्ताकुलः ?

व्याधः- चोरितानि वस्तूनि सर्वैः उपभुक्तानि। मया कृतानि सर्वाण्यपि कर्माणि पापकर्माणि। पापकर्मभिः नरका मिलन्तीति बुधाः वदन्ति।

व्याधवधूः- सम्प्रति एतत् सर्वं निरर्थकं चिन्तनं कथमवतारितम् ?

व्याधः- भार्ये ! निरर्थकं मा वद, अद्यैकः काषायवासाः संन्यासी मिलितः।

व्याधवधूः- ततस्ततः !

व्याध- मया वने स रोधितः।

व्यावधूः- ततः किम् !

व्याधः- मया तर्जितेऽपि स शान्तो निर्भयः स्मितवदनश्चैव अभवत्।

व्याधवधूः- एतेन किम् !

व्याधः- तेनोक्तम् - चौर्येण, जीवघातेन, तर्जनादिभिश्च नरका नियता भवन्ति।

व्याधवधूः- अपि भवान् भीतः ! (बालाः किमपि न बुद्ध्वा पित्रोः मुखं पश्यन्ति)

व्याधः- भार्ये ! नरकाः सन्ति चेद् भेतव्यमपि। तेन संन्यासिना नरकाः सन्तीति सनिश्चयम् उक्तम्।

व्याधवधूः- अपि भवता विश्वस्तम् !

व्याधः- पूर्णविश्वासो नास्ति, परं तस्यैकेन कृत्येन सन्देहस्तु उत्पन्नः।

व्याधवधूः- संन्यासिना किम् खलु कृत्यं दर्शितम्, येन भवान् सन्दिग्धोऽभवत् ?

व्याधः- संन्यासिना मम दक्षिणकपोलः स्पृष्टः। तदनुपदमेव बहूनां जीवानां चीत्काराः श्रुताः।

व्याधवधूः- कुतः आकर्णिताश्चीत्काराः !

व्याधूः- नरकवासिनां मुखेभ्यः। यमराजस्य दूतास्तान् ताडयन्ति स्म।

व्याधवधूः- अपि सत्यम् ! कथं पीडयन्ति स्म ?

व्याधः- अहह ! किं वदानि !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हस्तौ पादौ शृङ्खलाभिर्निबद्ध्य
पृष्ठे यष्ट्या ताडयित्वा च भूयः ।
पीडागारेऽनल्पपीडां प्रदातुं
नीता पापा नेत्रयुग्मेन दृष्टाः ॥ अपि च
केचित् सिंहैर्दन्दशूकैश्च केचित्
केचिद् नागैर्ग्राहकाकैश्च केचित् ।
व्यापाद्यन्ते पापिनो याम्यदूतैः
पापी पापात् क्षम्यते नैव याम्यैः ॥

व्याधवधूः- भवता भीषणं दृश्यं दृष्टम् । संन्यासी मायावी भवेत्, त्वां विभ्रमयितुं मायाजालं दर्शितं स्यात् !

व्याधः- स कश्चन दीप्तिवान् सिद्धोऽस्तीति तर्कये । तस्य वचः श्रुतिप्रियं हितकारि चानुभूतम् । मायावीति निगद्य तमुपेक्षितुं नेच्छति मानसम् । तथा हि -
सौम्या स्निग्धा मन्दहासाऽतिरम्या
तेजोदीप्ता निर्भया मूर्तिरस्ति ।
मन्ये श्यामां लोभनीयां धरित्रीं
द्रष्टुं भास्वानागतः किं धरायाम् ॥

व्याधवधूः- संन्यासिना भवतो मनो हृतमिति बिभेमि ।

व्याधः- भार्ये ! तथा न, परं संन्यासिनः कथनेनैका जिज्ञासा उद्भूताऽस्ति ।

व्याधवधूः- कीदृशी जिज्ञासा !

व्याधः- मया अधुना यावद् विहितानां पापकर्मणां फलं परिवारजना भुञ्जन्ति वा नेति !

व्याधवधूः- कीदृशं फलम् !

व्याधः- नरकपाति फलम् !

व्याधवधूः- त्वं कीदृशं दुष्प्रश्नं करोषि ? अहं बालाश्च तव परिवारजनाः । परिवारस्य पालनं पोषणञ्च तव कर्तव्यम् ।

व्याधः- एतत्तु मया विहितमेव, परं परिवारस्य पालनपोषणयोः क्रमे विहितानां पापानां फलं परिवारजनाः भोक्ष्यन्ति न वेति पृच्छामि । एषैव मम मुख्या जिज्ञासा वर्तते ।

व्याधवधूः- यः पापं पुण्यं वा यत् कुरुते तस्य सुफलं दुष्फलं वा स एव भुनक्ति । एकस्य दुष्कर्मणः फलमन्यः कथं भुनक्तु नाम !

व्याधः- (सखेदम्, दीर्घं निश्वस्य नटति) अहं नाऽन्यस्तव पतिः । केवलं मयोपाहृतम् अन्नवासादिकमेव न प्रयोक्तव्यम्, परं पापपुण्ययोः फलञ्च युष्माभिर्भोक्तव्यं भविष्यति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याधवधूः- (ईषद् रोषं प्रकटय्य) त्वं कीदृग् मूर्खोसि, तव पापकर्मणः फलं भोक्तुं किं वयमपि कारागारं गच्छाम वा नरकं याम । पापकर्म त्वया कृतं नास्माभिः । अतस्तस्य फलमपि त्वयैव भोक्तव्यम् ।

व्याधः- अहमधुना अन्तिमवारं पृच्छामि यद् किं मया विहितस्य पापस्य फलं यूयं न भुङ्क्थ ?

व्याधवधूः- पापफलं वयं न भुज्मः । केवलं अन्नवासादिकमेव प्रयुञ्ज्महे ।

बालाः- माता यत् कथयति तदेव सत्यम् ।

व्याधः- मया सर्वं ज्ञातम् । संसारोऽयं स्वार्थपूर्णोऽस्ति । अत्र प्रत्येकं जनः सर्वथा स्वस्यैव प्रयोजनं पूरयितुं यतते । अन्यस्य पीडायां कोऽपि कथंविधमपि ध्यानं न ददाति । धिङ्मे मूढताम् । (प्रतिष्ठते)

(इति निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयोऽङ्कः

(प्रथमं दृश्यम्)

अपराह्णः समयः एकान्तवनम् ।

(गण्डकीतटवर्तिनि वने वृक्षबद्धो देवर्षिर्नारदो वर्तते । स्मितवदनो नारदः अक्षीणि निमील्य नारायणनाम जपति । अत्रान्तरे म्लानमुखो व्याधः प्रविशति ।)

व्याधः- (आत्मगतम्) धिङ् माम् । धिङ् माम् । येषां पालनपोषणार्थं विपुलानि कष्टानि असहे । असह्यं दुःखमपि न गणितम् । कियन्तो जीवा घातिताः । अवलुण्ठिताश्च । एतस्य परिणामो मया भोक्तव्य एव । मम दण्डनमिमे मूकीभूय पश्यन्ति । मम पीडायां न रुदन्ति । ममार्जनं भुक्त्वा मामुपेक्ष्यन्ते । धिगेतान् धिगेतान् । एतेषां रक्षणाय मया किं न कृतम् ! तथा हि-

प्रकृतेरुरसि निश्छलभावाद्
भार्यया सह वने भ्रममाणः ।
लब्धयौवनदशोऽजिनयोनि-
र्निर्दयं शरचयैर्निपातितः ॥

अपि च-

पान्थान् विलुण्ठ्य धनिनां सदनं विभिद्य
नागान् निपात्य हरिणान् महिषाँश्च हत्वा ।
पत्न्याः सुतस्य च सुखाय कृतं कुकर्म
किं पातयेन्न निरयं वत बालिशं माम् ॥

देवर्षिः- अपि समागतोऽसि ? पत्नीपुत्राणां को विचारः ! (अश्रूणि विमुञ्चन्, वन्धनरज्जुं छित्त्वा, विपञ्चीं प्रदाय च देवर्षेः पादयोः पतति । देवर्षिः बाहुयुगलेन तमुत्थापयति)

व्याधः- ऋषे ! हा हतोऽस्मि ! (मुह्यति)

देवर्षिः- उत्तिष्ठ भ्रातः ! अधुना तव भाग्यमुदितम् । रत्नाकर ! विगतं गतम् । वर्तमानं निर्मिमिष्व । वर्तमाने निर्मिते भविष्यं स्वत उज्वलं भविष्यति ।

व्याधः- (रुदन्) भगवन् ! ममापि उद्धारो भवेत् !

देवर्षिः- (किञ्चिद् विचार्य) व्याध ! रत्नाकर ! कथं न भवति ! भगवन्नाम्नि यावती शक्तिरस्ति तावत् पापं कर्तुं कोऽपि पापी न शक्नोति । अन्धकारो यावान् भयावहो विपुलो वा भवतु नाम, परं दिनकर उदयमात्रेण तं नाशयति । परं सविश्वासं सधैर्यं च सततं भगवन्नाम जप्तव्यम् !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याधः- (सहर्षम्) भगवन् ! जपामि, सर्वात्मना भवतः आदेशं परिपालयामि ।

देवर्षिः- (स्वगतम्) बहुषु भगवन्नामसु कतमं नाम श्रावणीयम् । भगवन्नाम भगवत्स्वरूपमेव । सर्वेषां तारकं रामनामैव श्रावयामि । पापाधिक्यादयं शुद्धनाम उच्चरितुं न प्रभवति । अस्तु विपर्ययाक्षराणि वच्मि । (प्रकाशम्) रत्नाकर ! शृणु (दक्षिणकर्णे) 'मरा' इति नाम श्रावयति ।

व्याधः- (सहर्षं) भगवन् ! धन्योऽस्म्यहम् । (पादयोः पतति)

देवर्षिः- (आशिषं प्रयुञ्जानः) सफलो भव सौम्य ! सविश्वासं जप । सततं जप । न विरम । अधुना साधयामि ।

(देवर्षिः सतोषं निर्गच्छति)

द्वितीयं दृश्यम्

(सर्वत्र प्रकाशमयता) ब्रह्मलोकः ।

(ब्रह्मलोकः ब्रह्मा ध्यानावस्थितः । समीपे शारदा मन्दस्वरेण कच्छपीं रणयन्ती आस्ते । अत्रान्तरे देवर्षेर्नारदस्य प्रवेशः)

देवर्षिः- (शिरोऽवनम्य) नमो ब्रह्मणे आदिपुरुषाय ।

ब्रह्मा- (अक्षिणी उन्मील्य) सज्जनाग्रणीर्भव वत्स ।

देवर्षिः- अनुग्रहीतोऽस्मि । (शारदां विलोक्य) मातः ! सश्रद्धं प्रणमामि ।

शारदा- यशस्वी भव वत्स ।

ब्रह्मा- पुत्र ! त्वं प्रमुदित इव प्रतीयसे । अस्ति कश्चिद् नवीनो वृत्तान्तः ? कयाचिद् नूतनघटनया प्रभावितोऽसीति लक्षये ।

देवर्षिः- पितः ! भवताऽबुद्धं किं स्यात् ! तथापि भवन्निर्देशनं प्राप्य वच्मि ।

ब्रह्मा- कथय । नवां घटनां श्रोतुमुत्कठायते चेतः ।

देवर्षिः- तीर्थयात्रायाः क्रमे साम्प्रतमेवाहं महिममय्या उच्चहिमालयशृङ्खलया परिवेष्टितं नेपालदेशं प्राप्तः ।

ब्रह्मा- (उत्पुलकीभूय) उत्तमम् । पुण्यभूमिं प्राप्तस्त्वम् । एषा ऋषीणां तपोभूमिरपि ।

देवर्षिः- नेपालस्य शालग्रामवाहिनीम् अनन्तपुण्यप्रदां कृष्णगण्डकीम्, रहुगण्डकी-कृष्णगण्डक्योः सङ्गमं रिडीक्षेत्रम्, कालीगण्डक्याः शिरोभूतं दामोदरकुण्डम्, सप्तगण्डक्याः सङ्गमस्थलीं नारायणीम्, देवघट्टक्षेत्रञ्च प्राप्तः ।

ब्रह्मा- वत्स ! धन्योऽसि । सर्वोत्तमानि तीर्थक्षेत्राणि त्वया सेवितानि । कृष्णगण्डक्या महिमानं प्रकाशयितुं न कश्चनो देवो मनुष्यो वा समर्थः । एषा नदी प्रवहणावसरे शालग्रामशिला निर्माति । याश्च नारायणस्य साक्षाद् विग्रहा वर्तन्ते । सत्या वृन्दायाः शापं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सार्थकीकर्तुं भगवता नारायणेन शालग्रामशिलायाः रूपं धृतमस्ति । जना विभिन्नवर्णासु शालग्रामशिलासु भगवतो नारायणस्य अर्चां कुर्वन्ति ।

देवर्षिः- पितः ! सत्यमेव कृष्णायाः शिलासु नारायणस्य विभिन्नानि रूपाणि परिलक्ष्यतानि । तथा हि -

केचिच्छुभ्राः श्यामला गोलदेहाः
केचिल्लम्बा बिन्दुरेखादियुक्ताः ।
शालग्रामाः कृष्णनद्याः प्रवाहे
लग्ना दृष्टाः पापतूलस्य दाहे ॥

शङ्खैश्चक्रैरङ्कुशैरब्जमाल्यै-
र्नागैर्मत्स्यैः कच्छपाद्यैश्च चिह्नैः ।
शालग्रामा शोभमाना धरायां
कीर्णा जीवाः सन्ति किंवेव भान्ति ॥

ब्रह्मा- पुत्र नारद ! देवघट्टधाम्नो महिमाऽपि भुवि अवर्णनीयोऽस्ति ।

देवर्षिः- कथमिव भगवन् ?

ब्रह्मा- वत्स ! तपस्यतोर्नरनारायणयोः स्वेदात् शुक्ला कृष्णा गण्डक्यौ उत्पन्ने । एतयोरेकीभवनं देवघट्टधामनि सम्भूतमिति कारणाद् देवघट्टधाम्नो महत्त्वमद्वितीयमेवास्तीति जानीहि । किञ्च शिवतनूद्भवायाः त्रिशूल्याः विष्णुतनूद्भवायाः कृष्णगण्डक्याः सम्मेलनस्थलस्य कारणाद् देवघट्टधाम्नः प्रसिद्धिः हरिहरक्षेत्रनाम्नाऽपि वर्तते ।

देवर्षिः- भगवन् ! हरिहरयोर्निवासस्य कारणाद् देवघट्टधाम्नो निषेवणं कोटिपुण्यप्रदमिति मन्ये ।

ब्रह्मा- साधु अवगतं शृणु-

पुरा देवसङ्घेन साकं धरायाः
स्थलेऽस्मिन् मया वै कृतो मुख्ययागः ।
प्रयागाद्यनाम्ना ततः ख्यातिमायात्
चिरं कोटिपुण्यप्रदो देवघट्टः ॥

देवर्षिः- भगवतः कथनानुसारेण देवघट्टः आदिप्रयागक्षेत्रं किम् ?

ब्रह्मा- अथ किम् । वत्स ! कथय ततस्त्वं कुत्र गतः ?

देवर्षिः- ततो नारायणीनदीमार्गात् त्रिवेणीतीर्थं प्राप्तः ।

ब्रह्मा- त्रिवेणीतीर्थं महापुण्यप्रदं तीर्थं वर्तते । यत्र नारायण्याः शोण-पञ्चनद्योश्च सङ्गमोऽस्ति । अक्षय्यपुण्यप्रदातॄणां हिमनदीनां सङ्गमात् त्रिवेणीतीर्थं गङ्गायमुनासरस्वतीनां सङ्गमतीर्थमिव पवित्रतमं विद्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवर्षिः- अक्षय्यपुण्यप्रदाय त्रिवेणीसङ्गमाय नमः ।

ब्रह्मा- वत्स ! त्रिवेणीधाम्नोऽपरं महत्त्वमपि शृणु ।

देवर्षि- भगवन् ! अवहितोऽस्मि ।

ब्रह्मा- अस्मिन् तीर्थवरे भगवता हरिणा ग्राहग्रस्तो गजेन्द्रो मोचित इति कारणादस्यापरं नाम गजेन्द्रधामापि प्रथितं वर्तते ।

देवर्षिः- किमस्मिन्नेव तीर्थे हरिणा ग्राहसङ्कटाद् गजेन्द्रो मोचितः ?

ब्रह्मा- अथ किम् ।

देवर्षिः- भगवन् ! तर्हि एतस्य धाम्नो महत्त्वं महनीयमेव । नमस्तीर्थराजाय त्रिवेणीधाम्ने (प्रणमति) ।

ब्रह्मा- वत्स ! ततः किमकरोः ?

देवर्षिः- भगवन् ! त्रिवेणीतीर्थे स्नानपूजनतर्पणानि सम्पाद्य पारेतीर्थं प्रापम् । तत्र घनां वनवीथीं दर्शं दर्शं चरन्तं मां कश्चन वनेचरो न्यषेधत् ।

ब्रह्मा- त्वम् अकिञ्चिनो योगीति मूढः स कथं जानातु नाम ।

देवर्षिः- स वनेचरः पान्थानां लुण्ठकः शाकुनिको व्याध आसीत् । अस्य पार्श्वेऽपि किञ्चिद्धनं स्यादिति धिया स मां न्यषेधत् ।

ब्रहमा- त्वं किमब्रवीः ?

देवर्षिः- मयोक्तं यद् अहमस्मि एको यतिः । मत्पार्श्वे केवलं परिहितमेकं धौतमेका वीणा च वर्तते । त्वं वीणां गृह्णासि वा धौतम् वोभयमेव ? व्याधोऽवदत्- वीणां गृह्णामि, तदनु मया वीणा अर्पिता ।

ब्रह्मा- ततस्ततः?

देवर्षिः- मया वनेचरः पृष्टो यद्, वनेचर ! त्वं किमर्थं जनान् लुण्ठसि, पशुपक्षिणो हंसि ?

ब्रह्मा- व्याधः किमुत्तरयत् ?

देवर्षिः- परिवारपालनाय, प्राणधारणाय चेत्युक्तवान् ।

ब्रह्मा- स्वपुष्ट्यै परिवारपुष्ट्यै वा एवंविधं दुराचरणं कथमाचरति मर्त्यः ?

भ्रामं भ्रामं मनुजवसतौ वायसाः कुक्कुरा वा
प्राप्तं यत् स्यात्तदपि सुखिनो मन्वते स्वान् नितान्तम् ।
काये बुद्धौ प्रवचनकलादौ च योग्योऽपि मर्त्यो
लोकान् संपीडयति यदि चेज्जीवनं धिग् धिगस्य ॥

देवर्षिः- तदनु मया कथितम्- वनेचर ! त्वया यत् पापं विधीयते तस्य फलम् अपि परिवारजना विभजन्ति ? व्याधेनोक्तम्- अवश्यं विभजन्ति ।

ब्रह्मा- ततो व्याधः किमकरोत् ?

देवर्षि- मया उक्तम्- एतत्त्वं कथं सविश्वासं वक्षि ? ततो व्याधेनोक्तम्- परिवारजने मम पूर्णविश्वासोऽस्ति । मया सस्मितम् उक्तम्- वत्स !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि त्वया परिवारजनाः पृष्टाः ? व्याधेनोक्तम् तस्यावस्यकतैव नास्ति ।

ब्रह्मा- ततस्ततः ?

देवर्षिः- मया कथितं विनैव परीक्षणं कथं त्वं विश्वसिसि ? व्याधोऽकथयत्- मां गृहं संप्रष्य पलायितुमिच्छसि किम् ? मयोक्तम्- न पलाये ।

ब्रह्मा- ततस्ततः ?

देवर्षिः- मम पलायनस्य शङ्कया व्याधो मां तरौ लतासन्तानेन बद्ध्वा गृहमगमत् ।

ब्रह्मा- ततस्ततः !

देवर्षिः- क्षणानन्तरमागत्य वनेचरो मम पादयोर्न्यपतत् ।

ब्रह्मा- (साश्चर्यम्) ततस्ततः ?

देवर्षिः- वाष्पस्तम्भितकण्ठो व्याधोऽवदत्- भगवन् ! मामवतु । मया परिवारस्य वास्तविकता ज्ञाता ॥ सर्वथा नैजहितमेव ते चिन्तयन्ति । मम पापफले ते सहभागिनो भवितुं नेच्छन्ति । भगवन् ! मामवतु ! अचिरं मामवतु ।

ब्रह्मा- पश्चात्तापो मनः शोधयति । ततः !

देवर्षिः- पितः ! ततो मया चिन्तितम्- अयमशोधितः । भवतु तारकमन्त्रस्य विपर्ययाक्षराणि श्रावयामि ।

ब्रह्मा- वत्स ! त्वया 'मर' इत्यक्षरद्वयं श्रावितं भवेत् !

देवर्षिः- एवं भगवन् !

ब्रह्मा- साध्वनुष्ठितम् । विषयकूपे पतितानामुद्धरणमेव सज्जनत्वम् ।

देवर्षिः- भगवन् ! प्रपन्नस्य शरणदो नारायण एव । अन्ये कदाचिद् निमित्तायमाना भवन्ति ।

ब्रह्मा- वत्स ! सिद्धगुरोरनुग्रहाद् मन्त्रस्य सततजपप्रभावाच्च तवैष नवशिष्यः सफलो भविष्यतीत्यत्र विश्वस्तोऽस्मि ।

देवर्षिः- अनुगृहीतोऽस्मि भवतो वचनामृतेन ।

शारदा- वत्स ! मामकीनं मनः सूचयति मन्त्रराजप्रभावेण प्राप्तसिद्धिरेष आद्यो महाकविर्भविष्यतीति ।

देवर्षिः- मातुः शुभाशिषः फलन्त्येव । वन्दे मातरम् । वन्दे पितरम् । अधुना तीर्थान्तरप्रस्थानाय आपृच्छे ।

ब्रह्मा- (उभौ) यथा भवते रोचते ।

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयोऽङ्कः

पूर्वाह्णकालः । एकान्तवनम् ।

(ततः प्रविशति तीर्थक्षेत्राणां दर्शनेच्छुर्वीणां वादयन् विहायसा देवर्षिर्नारदः)

देवर्षिः- कश्चिद्भ्रान्तः कुकृतिबहुलं भूतले किं न कुर्याद्
गृह्णीयाच्चेद् हरिपदयुगं शोधितोऽसौ ध्रुवं स्यात् ।
जानन्तो वा निरयसदनं देहगेहात्मजादौ
मुह्यन्त्येन्ते कथमिह गृहस्था मुरारिं विहाय ॥

भगवन् ! तव माया कियती बलवत्यस्ति । तथा हि -

दैवी माया भवति सबला यत्र बद्धा मनुष्या
आनन्दौघं तव पदयुगं विस्मरन्तीह नूनम् ।
एवं हेतोर्जनिमरणयोः कालचक्रे पतन्ति
दैवाल्लब्धामनुपमजनिं हन्त ! सम्पातयन्ति ॥

(अधो निरीक्ष्य) इमा अप्सरसः कन्नु खलु साधकं नृत्यादिहावभावैः भावयितुमिच्छन्ति ?

आः ज्ञातम् ! शक्रेण प्रेषिता अप्सरसो नवतपस्विनं तपसो विरमयितुं कामयन्ते। तपस्वी दृढनिश्चयी दृश्यते। वल्मीकच्छादितोऽपि तपसो न विरमति। भवतु वनप्रान्तस्य कस्मिंश्चित् तरौ स्वं सङ्गोप्य पश्यामि । एताः किं किं कुर्वन्ति । (नारदस्तरुमूले स्वं सङ्गोप्य तिष्ठति । अप्सरसस्तपस्विनो निकटमेव नृत्यन्ति, गायन्ति च। वसन्तस्तरुलतासु पुष्पसमृद्धिं वर्द्धयति। मदनः कुसुमेषून् प्रहरति । परं सर्वं विफलायते ।)

अप्सराः- जनान् हावभावादिभिर्मोहयन्त्यो
वयं रूपरम्याः स्म रामा लसन्त्यः ।
तपस्विन् ! त्वदीयं कियद् भाग्यमास्ते
यतस्त्वद्हितार्थं वयं संस्थिताः स्म ॥

अन्या- तपस्विन् ! पुरस्तात् सुदृष्टिं प्रदेहि
मनोमोहकं भाति गीतञ्च नृत्यम् ।
तपस्त्वं दुरूहं विधत्से किमर्थं
सुखं नास्ति किञ्चिद् वयो याति व्यर्थम् ॥

अपरा- उन्मीलय नयनयुगं विरम समाधेः, कथय सानदञ्च ।
पश्य पुरो रूपवतीः, या उपस्थितास्त्वत्सेवायै ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतरा- कियन्तः सम्राजो महेन्द्रवरुणादिदेवाश्च कियन्तः। प्राप्तुमस्मान् यतन्ते, कथमुपेक्षितुं शक्नोषि त्वम् ॥

(तपस्वी अविचलं तपस्यति। लब्धपराजया अप्सरसो निवर्तन्ते।)

देवर्षि- अयं को नु तपस्वी स्यात् ? (ध्यायन्) आः ज्ञातम् ! (सहर्षम्) स एव आखेटजीवी सम्प्रति सिद्धयुन्मुखोऽस्ति। सत्यमेव भगवन्नाम्नि कियती अनिर्वाच्याऽस्ति शक्तिः। तथा हि -

जापं जापं जगदघभिदं तावकं नाम विष्णो !
सिद्धिं लब्ध्वाऽचिरमिह ध्रुवो लोकमान्यो बभूव।
प्रह्लादोऽसौ मम वचनतो देवमायामतारीत्
भक्त्या ग्राह्यस्त्वमसि भगवन् नैव जात्या न मत्या ॥

किञ्च

व्रात्याः स्वपाकाः पशुपक्षिघातका
म्लेच्छा नृशंसा अपि दुष्टचेतसः।
उच्चार्य नामानि तरन्ति ते हरे !
सतां प्रसङ्गात् ननु को न मुच्यते ? ॥

(अत्रान्तरे नारदो नभसि प्रकाशं विलोकयति। देवा वियतः पुष्पाणि वर्षयन्ति। गन्धर्वा गायन्ति, अप्सरसो नृत्यन्ति च। प्रजापतिर्ब्रह्मा लोकपालैः सप्तर्षिभिश्च सहोपतिष्ठते)

देवर्षिः- अहो ! प्रजाधिपतिर्ब्रह्मदेवः समागतः। (तूर्णं गत्वा प्रणमति) 'नमो भगवते प्रजाधिपतये ब्रह्मदेवाय'

ब्रह्मा- (सस्मितं निरीक्ष्य) वत्स ! अधुना ते नवशिष्यो वरप्राप्तेरधिकारी संवृतः। तस्मै वरं दातुं प्राप्तोऽस्मि।

देवर्षिः- नामजपस्य प्रभावेण ईशानुकम्पया चैष सफलोऽस्ति।

ब्रह्मा- (तपस्विनो निकटमेत्य) वत्स ! उत्तिष्ठ ! वरं ब्रूहि, (कमण्डलुजलं क्षिपति, तदानीमेव तपस्वी सबलाङ्गः, सर्वाङ्गसुन्दरः, पुष्टश्चभवति।)

तपस्वी- नमो भगवते महामहिमशालिने ब्रह्मदेवाय।

ब्रह्मा- यशस्वी भव मुने ! वरदानायागतोऽस्मि, वरं ब्रूहि !

तपस्वी- ब्रह्मदेवस्य, गुरुवराणाम्, सप्तर्षीणाम्, अन्येषां लोकपालानाञ्च दर्शनेन सर्वे कामाः प्रपूर्णाः। मनःकषाया विनष्टाः। केवलं जानकीजाने राघवेन्द्रस्य चरणयोरहैतुकीं भक्तिं कामये।

ब्रह्मा- (सहर्षम्) एवमेव भवतु। मुने ! तपःकाले त्वं वल्मीकेनाच्छन्नोऽभवः। अतस्तव नाम अद्य वाल्मीकिरिति निर्धारयामि। त्वं त्रिकालदर्शी महर्षिर्भविष्यसि। सीतारामयोर्दर्शनञ्च लप्स्यसे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिः- सर्वथा अनुग्रहीतोऽस्मि ।

(ब्रह्मा सप्तर्षिभिः लोकपालैश्च सह अन्तर्हितो भवति)

देवर्षिः- (स्वगतम्) भगवन् ! तव विपरीतनामाक्षराणां जपेन दस्युरपि देवो भवति, तदपि जनाः सर्वर्था करुणावरुणालयं भवन्तं कथं नाश्रयन्ते । हन्त ! भागवती माया सातिशयं बलवत्यस्ति ।

दस्युश्रेष्ठो लोकपीडाकरोऽसौ
ब्रह्मर्षित्वं प्राप भक्तेः प्रभावात् ।
तस्माल्लोका गेहरागं विहाय
श्रीशं नित्यं संभजध्वं सुखाय ॥

(भगवन्नाम गायं गायं बदरिकाश्रमं याति)

(इति निष्क्रान्ताः सर्वे)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थोऽङ्कः

प्रथमं दृश्यम्

प्रातःकालः । तमसातटे बाल्मीकेराश्रमः ।

(महर्षेर्वाल्मीकेराश्रमः । ब्रह्मचारिणो बटवः तमसानद्यां प्रातःसन्ध्याम् अनुष्ठाय आश्रमशालां प्रत्यावर्तमानाः सन्ति । आश्रमे एकत्र यज्ञशाला, अपरत्र गोशाला, इतरत्र विश्रामशाला, समन्तात् फलपुष्पोद्यानानि कतिचन पुष्करिण्यो धारागृहाणि च सन्ति ।)

एको ब्रह्मचारी- (प्रविश्य) अस्माकं शिष्याणां प्रातःसन्ध्या सम्प्रत्येव सम्पन्ना । भगवान् वाल्मीकिरधुना ध्यानस्थोऽस्ति । अनेन ससीतस्य राघवेन्द्रस्य समर्चनाय पुष्पाण्यवचेतुम् अहं निर्दिष्टः । (विलोक्य समन्तात्) आः अधुनोदीयमानस्य रवेर्नवकिरणानां सम्पर्केण प्रस्फुटमानानि कमलानि सौन्दर्येण सर्वेषां मनो हरन्ति । तथा हि -

बाहू प्रसार्य सुखदौ दिनकृद् नलिन्यै
सान्त्वं ददद् नभसि सम्प्रति काशते ह ।
हंसाश्च सारसवका विहरन्ति नीरे
को वा न तुष्यति विहृत्य वने च नीरे ॥

अन्यच्च-वाताः प्रवान्ति शिशिरा मकरन्दमूढ्वा
स्फूर्तिं प्रदाय परिहृत्य च जीवतापम् ।
भृँकारिणो मधुकरा मधुपानहेतो-
र्वाटीवनोपवनवृक्षलतासु यान्ति ।

(अत्रान्तरेऽपरब्रह्मचारिणः प्रवेशः)

अपरब्रह्मचारी- (प्रविश्य, पुष्पसौन्दर्यं पश्यन्)

सुवासेन हासेन रूपेण नृत्यैः
प्रसूनानि सम्मोहयन्त्येव जीवान् ।
मनुष्यस्य वार्तैव का पुष्परूपं
विलोक्येह रोमाञ्चितः को न भूयात् ?

सखे ! शीघ्रं पुष्पाणि अवचिनु । अहं चन्दनधर्षणाय यामि । (इति निष्क्रान्तः) (नेपथ्ये)

भो अन्तेवासिनः ! अधुना मर्यादापुरुषोत्तमस्य राघवेन्द्रस्य पादार्चनसमयः संवृत्तोऽस्ति । तदर्थं सर्वा अर्चनसामग्रीः सज्जीकृत्य आनीयन्ताम् ।

ब्रह्मचारी- (श्रुत्वा) महाराजकोशलेश्वरस्य अर्चनकालो नातिक्रमतु । भवत्वविलम्बं गच्छामि ।

(इति निष्क्रान्तः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

उत्तरप्रातःकालः । वाल्मीकेराश्रमः ।

(प्राङ्गणे भगवतो रामचन्द्रस्य मन्दिरं वर्तते । यत्र महर्षिर्वाल्मीकिः राघवेन्द्रं पूजयितुं वटून् प्रतीक्षते ।)

ब्रह्मचारिवटवः- (प्रविश्य) आचार्यवर ! पूजासामग्रीमादाय वयमायाताः स्मः ।

वाल्मीकिः- वत्साः ! मत्समीपं वसत ।

ब्रह्मचारिणः- आचार्यवर ! एते वयं समुपविष्टाः ।

वाल्मीकिः- वत्साः ! रघुकुलतिलकस्य राघवेन्द्रस्य तापहृच्चरणौ ध्यायत ।

स्निग्धौ सविमलौ शान्तौ
देवमानववन्दितौ ।
सर्वतापहरौ कान्तौ
चरणौ शरणं मम ॥

ब्रह्मचारिणः- ध्यानं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! राघवेन्द्राय आसनं समर्पयत ।

तवैव भिन्नरूपाणि
चराचरजगन्ति वै ।
अपरं कुत आनीय
किमासनमहं ददे ॥

ब्रह्मचारिणः- आसनं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! राघवेन्द्राय पाद्यं समर्पयत ।

त्वदङ्घ्रिकमलाद् गङ्गा
निसृता लोकपावनी ।
तज्जलेन भवत्पादौ
क्षालयामि रघूत्तम ॥

ब्रह्मचारिणः- पाद्यं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! अर्घ्यमर्पयत ।

लोकसेवाव्रतं नित्यं परिपालयते स्थिरम् ।
अहं ते सत्यसन्धाय ददाम्यर्घ्यं सुखावहम् ॥

ब्रह्मचारिणः- अर्घ्यं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! आचमनीयमर्पयत ।

प्रलये पीयते येन सर्वं ब्रह्माण्डमण्डलम् ।
तस्मै पातुं ददाम्यद्य किञ्चिदाचमनीयकम् ॥

ब्रह्मचारिणः- आचमनीयं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! पञ्चामृतं समर्पयत ।

राजाधिराजं श्रीमन्तं रघुवंशविभूषणम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चामृतेन दिव्येन स्नापयाम्यरिसूदन !

ब्रह्मचारिणः- पञ्चामृतं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! स्नानजलमर्पयत ।

सर्वथा शुद्धरूपं त्वां शोधयेत् केन कः कदा ।
तथाऽपि गाङ्गतोयेन स्नापयामि क्षमस्व माम् ॥

ब्रह्मचारिणः- स्नानजलं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

वाल्मीकिः- वत्साः ! राघवपरिवाराय पुष्पाञ्जलिं समर्पयत । (स्वयमपि यवलाजापुष्पाण्यादाय)

रामं सौमित्रिसेव्यं भरतजनकजासेविताङ्घ्रिं जनानां
सन्तापौघं हरन्तं दितिकुलदहनं देवसङ्कल्पपूरम् ।
भक्तेच्छाकल्पवृक्षं भवजलधितरिं ध्येयपादं मुनीन्द्रै-
र्मर्यादास्थापनार्थं धृतमनुजतनुं देवदेवं भजेऽहम् ॥

ब्रह्मचारिणः- पुष्पाञ्जलिं समर्पयामः, सपरिवाराय श्रीरामचन्द्राय नमः ।

(वाल्मीकिर्ब्रह्मचारिणश्च संयुक्तरूपेण पुष्पाञ्जलिं समर्पयन्ति)

वाल्मीकिः- (ब्रह्मचारिणो लक्ष्यीकृत्य) वत्साः ! सम्प्रति युष्माकम् अधीतपाठानामभ्यसनसमयः प्राप्तः । अतोऽध्ययनाय यात ।

ब्रह्मचारिणः- एवमेव करिष्याम आचार्य ! कुलपतिवर !

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयं दृश्यम्

तृतीयं दृश्यम्

मध्याह्णकल्पः कालः । पूजास्थलम् ।

(महर्षिर्वाल्मीकिः, कियन्तो ब्रह्मचारिणश्च सन्ति । महर्षिर्वाल्मीकिराश्रमे ब्रह्मचारिणो निर्दिशति)

वाल्मीकिः- वत्साः ! यूयं ब्रह्मचारिणः स्थ । अतो ब्रह्मचारिणः आचाराः युष्माभिः पालनीया भवन्ति । आचारस्य परिपालनमेव विद्या भवति । ब्राह्मणैराचाराज्जातित्वस्याधानं सम्पाद्यते । एष धर्मस्य, स्वाध्यायस्य, तपसश्च मूलं वर्तते । अपि बुद्धम् ।

ब्रह्मचारिणः- कुलपते ! कथंविधा आचाराः पालनीयाः, कृपया उपदिश्यताम् ।

वाल्मीकिः- वत्साः शृणुत !

ब्रह्मचारिणः- अवहिताः स्म आचार्य !

वाल्मीकिः- गृहकुले अवस्थितेन ब्रह्मचारिणा प्रातःसन्ध्यानुष्ठानस्य पश्चाद् गुरुं नत्वा गृहस्थानां पार्श्वमेत्य भिक्षा याचनीया । अग्न्याधानाय वनात् समिध आनेतव्याः । इन्द्रियचापल्यं नियम्य गुरुपार्श्वे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थातव्यम्। गुरुर्देववत् सम्माननियतव्यः। गुरुपत्न्यश्च सादरमर्चनीयाः।

ब्रह्मचारिणः- एतदनुष्ठीयते आचार्य !।

वाल्मीकिः- अपरञ्च शृणुत- स्वाध्यायोऽध्येतव्यः। ऋग्यजुःसमाथर्ववेदानां वैकस्य वेदस्याध्ययनं विधातव्यम्। ब्रह्मचर्यं सदा रक्षणीयम्। शिष्येण गुरोरन्तिकमुषित्वैव पठितव्यम्। ब्रह्मचारिभिः नृत्यगीतवाद्यानि न विधातव्यानि। नावलोकनीयानि च।

ब्रह्मचारिणः- ततस्ततः !

वालमीकिः- ब्रह्मचारी जटिलः श्मश्रुलश्च भूत्वा पठेत्। ऊढा महिलाः मातृवद् अनूढाश्च भगिनीवद् व्यवहरेत्। गुरोरादेशेन विना कुत्रापि न यायात्। आश्रमस्य नियमान् परिपाल्य तिष्ठेत्।

ब्रह्मचारिणः- कुलपते ! भवतो निर्देश्यमाधृत्यैव व्यवहरिष्यामः।

वाल्मीकिः- अहमपि भवद्भ्य एतदेवापेक्ष्ये। तथा हि -

शिष्यो भूत्वा गुरुमतिक्रमेच्छिष्यता का भवेत् सा
ज्ञातं ज्ञानं यदि न कथयेद् किं गुरोर्गौरवं तत्।
विद्याभ्यासादिषु गुरुजनाः शिष्यवर्गैर्मिलित्वा
कार्यं कुर्युः कथमिह तदा ज्ञानवृद्धिर्भवेन्न ॥

(नेपथ्ये) भो ब्रह्मचारिणः, रविर्दिनमध्यंगतो वर्तते। महूर्तद्वयं विश्रमत।

वाल्मीकिः- (आकर्ण्य) भो ! वत्साः ! अधुना मध्याह्नकालः उपस्थितः। मुहूर्तद्वयमध्ययनं स्थगितं भवति। अहं रवयेऽर्घ्यम् अर्पयितुं तमसां यामि।

(इति निष्क्रान्तः)
(इति निष्क्रान्ताः सर्वे)
इति चतुर्थोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ पञ्चमोऽङ्कः

(वाल्मिकेराश्रमः, अपराह्णकालः)

(नेपथ्ये)

शान्तं पापम् । पराकाष्ठा क्रूरतायाः ।

कश्चन ब्रह्मचारी- (प्रविश्य) महाननर्थो घटितः ।

अपरब्रह्मचारिणौ- (प्रविश्य) कीदृशोऽनर्थः ?

ब्रह्मचारी- नद्यां स्नात्वाऽऽश्रममागच्छत आचार्यस्य पुरतः एव क्रौञ्चः अपतत् ।

ब्रह्मचारिणौ- कथमपतत् ?

ब्रह्मचारी- बाणविद्धोऽपतत् ।

ब्रह्मचारिणौ- पतित्वा मृतो वा जीवितः ?

ब्रह्मचारी- पतनमनु मृतः ।

ब्रह्मचारिणौ- आचार्यस्तदा किमकरोत् ?

ब्रह्मचारी- आचार्यः परं खेदमन्वभवत् ?

ब्रह्मचारिणौ- तर्हि आचार्यपार्श्वं द्रुतं साधयाम ।

सर्वे- एवम्, एवमेव साधयाम ।

(इति निष्क्रान्ताः सर्वे) (इत्यङ्कावतारः)

प्रथमं दृश्यम्

(ततः प्रविशति करुणार्द्रो वाल्मीकिः । अपरत्राऽधोवदनो निषादः, कतिचन वनवासिनः शिष्याश्च)

वाल्मीकिः- (गतासुं पक्षिणं पश्यन्) अनवसरे त्वं कालकवलितः । (निकटे रुदतीं क्रौञ्चीं विलोक्य) क्रौञ्चि ! क्रूरेण शाकुनिकेन त्वं पत्या वियोजिताऽसि ।

निषादः- भगवन् ! वृत्तेरन्य उपायो नासीत् ।

वाल्मीकिः- युग्मस्थितौ त्वया बाणः प्रहर्तव्यो नासीत् । त्वं न जानासि किम् ? पत्यौ मृते शोकदावदग्धाया भार्याया अवस्था कियती कष्टसाध्या भवति ?

निषादः- पक्षिणो मृत्यावपि भवान् एवं खिद्यति ?

वाल्मीकिः- (ईषद् रोषं प्रकट्य)

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् !

(कमण्डलुजलं व्याधस्योपरि क्षिपति) अत्रान्तरे दिवि दुन्दुभयो नन्दन्ति । नभसः पुष्पवृष्टिर्जायते । शुभ्रं ज्योतिर्मण्डलं मध्येऽवतरद् दृश्यते । ज्योतिर्मण्डले ब्रह्मा आविर्भवति । ब्रह्मणा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह नारदः सप्तर्षयश्च समागताः सन्ति। वाल्मिकिर्ब्रह्मचारिशिष्याश्च ब्रह्मादीन् प्रणमन्ति।)

ब्रह्मा- भो प्राचेतस वाल्मिके ! त्वं वाक्सिद्धः कवीन्द्रः संवृत्तोऽसि। तव वदनाद् निसृतं छन्दोबद्धमिमं श्लोकं श्रुत्वाऽहं नितरां प्रसन्नोऽस्मि। केवलं वेदे एवानुस्यूतं छन्दस्त्वया लोके ऽवतारितम्। अस्मिन्नेव छन्दसि त्वं रामचरितं लिपिबद्धं कुरु। तपःप्रभावाद् ममाशीर्वचनाच्च त्वं गुह्याद् गुह्यतरमपीशचरितं करामलकवद् द्रक्षसि।

वाल्मीकिः- भगवन् ! भवता मयि भूयाननुग्रहः कृतः। अचिन्त्यमहिमस्य भगवतः कोशलेश्वरस्य महिमानं गातुमेष अल्पधीः कथं प्रभवति। तथापि भवदादेशं परिपालये।

ब्रह्मा- रामचरितसम्बन्धे नारदस्त्वां किञ्चित् निर्दिशति। भद्रमस्तु ते।

वाल्मीकिः- (नभो विलोक्य) एकः प्राणघाती दस्युरहम्। रामनाम्नः प्रभावाद् महर्षित्वं प्रापितः। भगवन् ! तव दयालुता अनिर्वचनीया। (क्षणं विरम्य) विश्वसृजा रामगाथां गातुमहं निर्दिष्टः। कथमेतद् गायानि ! भवतु आश्रममेत्य समाधितः स्मरिष्यामि। (इति निष्क्रामति)

(इति निष्क्रान्ताः सर्वे)

द्वितीयं दृश्यम्

(वाल्मीकेराश्रमः)

वाल्मीकिः- अधीशोऽस्ति ब्रह्माण्डकोटे रमेशो
न भूपालमात्रोऽस्त्यसौ राघवेन्द्रः।
कथं वक्ति मन्दोऽस्य दिव्यं चरित्रं
खगा उत्प्लवन्ते यथा ह्यन्तरिक्षम्॥

(अक्षिणी निमील्य) भो स्वामिन् ! भक्तवत्सल ! त्वमेव मार्गं निर्दिश। नाहं किञ्चिज्जानेा (अन्तरिक्षाद् देवर्षिर्नारदोऽवतरति)

देवर्षिः- भो महर्षे ! वाल्मीके ! कथमिव भवान् चिन्तामग्नः ?

वाल्मीकिः- नमोऽस्मद्गुरवे देवर्षिवर्याय।

देवर्षिः- (सशिरःस्पर्शमाशिषं ददद्) यशस्वी भव। लोकाय मार्गदर्शको भव।

वाल्मीकिः- भगवन् ! लोकस्य मार्गदर्शकः कथं भवेयम् ! भवानेव तन्मार्गं निर्दिशतु।

देवर्षिः- महर्षे ! भगवतो मर्यादापुरुषोत्तमस्य रामस्य चरित्रं प्रकाशयतु। एतल्लोकस्य भूत्यै भविष्यति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिः- रघुवंशशिरोमणे रामचन्द्रस्य चरितमपारं वर्तते । कथं प्रकाशयानि । कियत् प्रकाशयानि ।

देवर्षिः- भगवत्प्रसादात् भवान् निर्विघ्नमेव रघुनन्दनस्य चरितं लेखिष्यति । तथापि सारांशतोऽहं किञ्चिद्वच्मि । श्रूयताम् -

देवर्षिः- रामोऽस्ति सूर्यवंशीयः रघुवंशविभूषणः ।
ब्रह्मणः प्रार्थनां श्रुत्वा भूतले समुपागतः ॥
आद्यन्तहीनोऽपि विभुर्माया माश्रित्य मोहिनीम् ।
कौशल्यायाः पुत्ररत्नोऽभवद् दशरथस्य च ॥
सर्वलक्षणसम्पन्नो गुणैः सर्वैरलङ्कृतः ।
पितेवाऽसौ प्रजां शत्रोर्दस्युभ्यश्च ररक्ष ह ॥

वाल्मीकिः- राजानो येऽभवन् सूर्यसोमवंश्या महीतले ।
ततो रामस्य भूपस्य किं पार्थक्यं तदुच्यताम् ॥
किं चकार कथं रामो राजर्षिर्लोकभूतये ।
सर्वमेतद् मुने ! ब्रूहि शौर्यवृत्तं महीपतेः ॥

देवर्षिः- रक्षणाद् रञ्जनाच्चैव प्रजानामेष भूपतिः ।
राजेति सार्थकं नाम प्रायो लोकैः समादृतः ॥
राजा दशरथो दुःखं लेभे सन्तत्यभावतः ।
पुत्रेष्टियागतः शृङ्गैः कृपया पुत्रवानभूत् ॥
रामलक्ष्मणशत्रुघ्नभरताभिधपुत्रकान् ।
प्राप्य राजा च लोकाश्च भृशं मुमुदिरे ततः ॥

वाल्मीकिः- गुरुः कः परमेशस्याऽभवत् किं ज्ञातवान् ततः ।
अयोध्यायां परावृत्य रामः किमकरोद् विभुः ?

देवर्षिः- रामो गुरुकुले वासमकरोद् भ्रातृभिस्सह ।
वशिष्ठोऽध्यापयद् राजसूनून् शास्त्राणि कृत्स्नशः ॥
शीघ्रं गुरुकुलाद् रामो राजसद्मनि प्राप्तवान् ।
राजकर्मसु भूपस्य सहयोगी बभूव च ॥
अस्मिन् क्रमे ररक्षाऽसौ विश्वामित्रस्य चाध्वरम् ।
तुष्टोऽददाद् धनुर्विद्यां दिव्यास्त्राणि च कौशिकः ॥
शापादहल्यामुद्धृत्य गत्वा जनकमन्दिरम् ।
धनुर्भङ्गं विधायैष परिणिन्येऽथ जानकीम् ॥

वाल्मीकिः- कृतं प्राक् कीदृशं पुण्यं राज्ञा दशरथेन वै ।
बाल्यकैशोरलीला यो नित्यं पश्यति ब्रह्मणः ॥

देवर्षिः- प्रजानुरागं संवीक्ष्य वार्धक्यं स्वतनोस्तथा ।
राज्यं रामाय सन्दातुमियेष भूपतिस्ततः ।
राजाऽऽचार्याद् मन्त्रिणां चाप्यनुज्ञां
लब्ध्वा राज्यं सूनवे दातुमैच्छत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञी तु दैवप्रहिताऽभिषेकं
जघ्ने तदा मध्यमभूपपत्नी ॥
रामश्चतुर्दशसमा वनवासमेतु
रज्यं समृद्धमिह मे भरतः प्रशास्तु ।
एवं वरद्वयमवाप हठेन राज्ञी
तुष्टा परं नरपतिर्व्यथया मुमूर्च्छ ॥
प्राणान् जहौ नरपतिर्न जहौ स सत्यं
धीरास्त्यजन्ति तनुमत्र परं न सत्यम् ।
नारीहठेन विकृतं सकलं स्वरूपं
नारीहठं नु कतमः क्षमते निरस्तुम् ॥
रामः प्रयाति निविडं विपिनं सभार्यो
भ्रात्रा सहैव प्रययौ किल लक्ष्मणोऽपि ।
वासोऽभवद् मुनिगणादृतचित्रकूटे
पुष्पैः फलैर्लसितपञ्चवटीसमीपे ॥

वाल्मीकिः- अयोध्यायाः स्थितिः काऽऽसीत्
कृतवान् भरतश्च किम् ।
श्रोतुमेतद् मुनेर्वक्त्रात्
त्वरते मानसं मम ॥

देवर्षिः- सानुजो भरतोऽयोध्यां प्रापत् केकयदेशतः ।
धिक्कृत्य मातरं राज्यं त्यक्त्वा पञ्चवटीं गतः ॥
गुरुभिर्भ्रातृभिश्चैव भरतेनाऽपि प्रार्थितः ।
नाययौ राघवो राज्ये राज्यं किं स्याद् मनस्विनाम् ॥

वाल्मीकिः- किं किं वने विहितवान् रघुनन्दनोऽसौ
सीता च किं कृतवती विपिनस्य वासे ।
रक्षोगणैरपि रघूत्तमविघ्नहेतोः
किं किं कृतं दुरितकं वद ब्रह्मसूनो !

देवर्षिः- गत्वा च दण्डकवनं स्मरपीडिताया
नासां चकर्त किल शूर्पणखाऽभिधायाः ।
योऽस्त्रं प्रकट्य दितिजानवधीत् खरारिः
दुष्टान् कदाचिदपि न क्षमते मुरारिः ॥
हत्वा चतुर्दशसहस्रमितानि रामो
रक्षांसि रावणतनौ भयमावधान ।
चिन्तामहाज्वलनदग्धतनुर्दशास्यो
मारीचमाशु छलनाय च प्रैरयत् सः ॥
भीतं स्वरं रघुपतेरनुकृत्य रक्षो
रामानुजं जनकजास्थलतो व्यकर्षत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रान्तरे रचितभिक्षुसरूपरक्षः
सीतां जहार नभसा रुदतीमनैषीत् ॥
मार्गेऽवरोधिनमपास्य जटायुगृद्धं
तीर्त्वोदधिं समनयत् कनकाढ्यलङ्काम् ॥
प्राप्ते गृहेऽप्यधरदेव भयं दशास्यः
को वा विरुद्ध्य बलिनं न भयं धरेत ॥

एवंविधो महामहिमशाली सीतापतिर्वर्तते। तस्य चरितमेतद् विपुलीकृत्य दृष्टान्तकथाश्च संयोज्य भक्तिवर्द्धनलक्ष्यं ध्यात्वा भवान् वर्णयतु ।

वाल्मीकिः- भगवन् देवर्षे ! यथासंभवं भवदाज्ञां पालयितुं यतिष्ये ।

देवर्षिः- अवशिष्टं वच्मि किञ्चिच्-
छ्रूयतां मुनिपुङ्गव !
श्रुत्वा धृत्वा च मनसि
सम्यग् विस्तार्य वर्णय ॥

वाल्मीकिः- देवर्षे ! श्रोतुमिच्छामि वृत्तं सर्वत्र मङ्गलम् ।
श्रुत्वा रघुपतेः वृत्तं कस्तृप्यति नरो भुवि ॥

देवर्षिः- शवर्यै दर्शनं दत्तं बाली बाणेन घातितः ।
आभूषणानि लब्धानि सुग्रीवो मित्रताङ्गतः ॥
वानराणां सहाय्येन बद्धः सेतुश्च सागरे ॥
सीताहनूमतोर्मेलोऽभवल्लङ्कापतिस्ततः ।
इन्द्रजित् कुम्भकर्णश्च रावणश्चापि घातिताः ॥
सतीत्वस्य परीक्षाऽभूद्लोकप्रत्ययहेतवे ।
उत्तीर्णा ज्वलनात् सीता सत्याः किं स्यात्परीक्षणम् ॥
आरुह्य पुष्पकं रामो-ऽयोध्यां रम्यां समागमत् ।
प्रजा मुमुदिरे रामं दृष्ट्वा कोशलधामनि ॥
राज्याभिषेकमभवद् भव्यं सर्व उपस्थिताः ।
गुरवो मुनयो रामंसीताञ्चैवाशिषो ददुः ॥
चौरदस्युभयं नासीद्रामे राज्यं प्रशासति ।
न कोऽपि दुःखं लभते राज्ञि धर्मिणि भूतले ॥
प्रजा मुमुदिरे रामंराजानं प्राप्य रक्षकम् ।
न्यायशीलो नरेशश्चेत्तत्र किं स्यादमङ्गलम् ॥
उत्तरार्द्धञ्च रामस्य
न्यायशान्तिसुखप्रदम् ।
चरितं लिख ब्रह्मर्षे
दुरितक्षयकारकम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मर्षिः स्वस्तिमान् भूयाः
स्वस्तियुक्तान् जनान् कुरु ।
गास्यन्ति त्वद्यशः सर्वे
सदेवासुरमानवाः ॥
भवतु मङ्गलमहं साधयामि ॥

॥ इति निष्क्रान्तः ॥

वाल्मीकिः- (देवर्षेः प्रस्थानदिशं प्रणम्य)
देवर्षिवर्य ! वन्देऽहं
चरणौ मङ्गलायनौ ।
अनुज्ञां प्राप्य गायामि
रामस्य चरितं महत् ॥
(इति निष्क्रान्तः)

(इति निष्क्रान्ताः सर्वे)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षष्ठोऽङ्कः

प्रथमं दृश्यम्

(ब्रह्मसदनम्)

(ब्रह्मा ध्यानस्थोऽस्ति। शारदा निकटे वीणां क्वणित्वा मधुरनादं प्रकटयन्ती वर्तते। आत्रान्तरे देवर्षेर्नारदस्य प्रवेशः।)

देवर्षिः- वन्दे परमेष्ठिनं पूज्यपितरम्!
वन्दे मातरं शारदाम्।

ब्रह्मा- (अक्षिणी उन्मील्य) प्रसन्नतरो विभाव्यसे। अपि किञ्चित् सुकृतं कृतम्?

देवर्षिः- पूज्यपितः! सुकृतो मूर्तिस्तु भवानेव। भवन्निश्वासाद् वेदा निःसृताः। ये आचारं शिक्षयन्ति जनान्। वेदाः खलु विश्वव्यवस्थायाः विधानं वर्तते।

ब्रह्मा- तदपि कस्मैचित् किञ्चिदुपकृतमिति मन्ये।

देवर्षिः- परमपितः! भवान् सर्वं जानत्येव। तथापि मद्गौरवं वर्धयितुमेव वदतीति जानात्येषः। मया किमपि सुकृतं कृतं नास्ति, परं कश्चन मुनिर्विश्वस्यैव सुकृतं वर्धयितुं प्रयतमानोऽस्ति।

ब्रह्मा- सत्वरं कथय आत्मज! कः साधूत्तमो विश्वस्यैव कल्याणमभिलषति।

देवर्षिः- भवता साम्प्रतमेव य उत्तमश्लोकस्य चरितगानाय प्रेरित आसीत् तस्यैव सुकृतं चर्चयन् रमते एष यायावरीयः।

ब्रह्मा- तव कथनात् स्मृतं यत् स साधुर्वाल्मीकिरस्ति।

देवर्षिः- अथ किम्!

ब्रह्मा- पुत्र! तेन किं कृतम्?

देवर्षिः- सृष्टिकारिन्! असौ वाल्मीकिर्विश्वस्येव हितं विधित्सुर्दृश्यते रामायणं विलिख्य।

ब्रह्मा- साध्वाचरितं महर्षिणा! तथा हि -

गायन्ति ये ये च लिखन्ति ये ये
प्रचारन्तीह जनेषु ये ये।
साधूत्तमास्ते बहुपुण्यभाजः
परोपकाराय जनिं धरन्ति॥
यशःशरीरेणानन्तकालं जीव्याद् महर्षिः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शारदा- त्रिलोकमान्यो भूयात् ।

देवर्षिः- सर्वथा फलन्त्येव लोकोत्तरमहिमशालिनामाशिषः ।
आपृच्छे गौरीशङ्करयोर्दर्शनाय प्रस्थातुम् ।
नमः पितृचरणकमलाभ्याम् । (प्रणमति) (निष्क्रान्तः)
(इति निष्क्रान्ताः सर्वे)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयं दृश्यम्

(कैलासालयः)

(शिवः समाधिमग्नः, शिवा शिवपादार्चनरता, नन्दीभृङ्ग्यादयः प्रमथगणमुख्याश्च 'ॐ नमः शिवाय' इति मन्त्रजपे निरताः सन्ति। अत्रान्तरे देवर्षिः प्रविशति।)

देवर्षिः- वन्दे महायोगीश्वराय अष्टमूर्तये शिवाय।

शिवः- (अक्षिणी उन्मील्य) वत्स नारद! कथमत्रागमनम्?

देवर्षिः- परमेश्वरयोर्दर्शनाय।

शिवः- स्वस्ति भूयाद् वत्स! अस्ति विशिष्टो लोकवृत्तान्तः?

देवर्षिः- भगवता विश्वचक्षुषाऽदृष्टं किं स्यात्, तथापि दृष्टां काञ्चिद् घटनां पुरस्सारयामि।

शिवः- उच्यताम्।

देवर्षिः- महर्षिर्वाल्मीकी रामचरितं लिलिखिषति। एतस्य रामगाथागाने तत्परतां विभाव्य प्रसन्नो भूत्वा भवद्दर्शनार्थमागतोऽस्मि।

शिवः- महर्षिणा समुचितं निर्णीतम्। पुरा गिरिजा जनकल्मषहारि गोपनीयतमं तत्त्वं प्रकाशयितुं माम् अनुरुद्धवती। तदानीं मया तस्यै रामतत्त्वं प्रकाशितम्। तत्त्वमेतद् दुरितहारि भवभयापहारि च वर्तते। तथा हि

क्रिया कर्ता कार्यं सकलमपि सीतापतिमयं
विभाव्यैवं प्राप्ताश्चरणशरणं ये रघुपतेः।
अविद्यापाशं ते त्वरितमिह छिन्दन्ति सहजं
यमो वाऽन्यः को वा प्रभवति निबद्धुं हरिजनम्॥

देवर्षिः- नास्ति शङ्कालवोऽधुना यद् भवदाशिर्भिरसौ महर्षिः सर्वं रामतत्त्वं प्रकटयितुं प्रभविष्यति। आपृच्छे च प्रस्थानाय। (इति निष्क्रान्तः)

तृतीयं दृश्यम्

प्रातःकालः। पुष्पवाटिका।

(पुष्पावचयनाय बटुद्वयस्य प्रवेशः)

प्रथमबटुः- (प्रविश्य) अस्मदाचार्याः प्रातर्दिवा सायमपि भूर्जपत्रे लिखन्ति। किं लिखितं स्यादाचार्यवर्यैः?

द्वितीयबटुः- रामायणं लिखितमिति शृणोमि।

प्रथमः- रामायणे किं लिखितं भवेत्?

द्वितीयः- रामायणे रामचरितं प्रकाशितं वर्तत इत्याकर्णितम्।

प्रथमः- कोऽस्ति रामः? यं बृहस्पतिरिव प्रज्ञावन्तोऽस्मदाचार्याः स्तुवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः- आचार्याणामाराध्यदेवो भवेत् ।

प्रथमः- लिखत्येव न केवलम् । लेखनावधौ कदाचिद् रोदिति, हसत्यपि कदाचित् । तदा कुलपतयः फलितमनोरथा इव प्रसन्ना दृश्यन्ते ।

द्वितीयः- भक्तेर्महिमैव एतादृग् भवति । मम पितरावपि देवचरितस्य विष्णुचरितस्य च पाठादौ, श्रवणादौ वा रुदन्तौ, हसन्तौ च मया दृष्टावास्ताम् ।

प्रथमः- तर्हि अस्मदाचार्योऽपि तव पितराविव भक्तिप्लावितो भूत्वा रोदिति ।

द्वितीयः- अथ किम् ? मया पिता भवान् किमर्थं रोदितीति कदाचित् पृष्टः । तदा सोऽवदत्- भक्तेः स्वरूपमेव एतादृग् भवति । भक्त्या चरमसन्तुष्टिर्मिलति । भगवतश्चरितश्रवणात् कीर्तनाच्च सर्वे मनोविकारा दह्यन्ते । चेतो लघु, प्रकाशकञ्च जायते । तस्यैव प्रभावेण स्वत एव रोदनं हासश्च प्रवर्तितावि ति ।

प्रथमः- हासे प्राप्तेऽप्यानन्दे रोदनेन तु दुःखमेव स्यात् ?

द्वितीयः- सखे तथा नाऽऽकलय । ईशचरिते मनसो द्रवणाद् रोदनेऽपि सुखमेवोत्पद्यते । तत्र दुःखस्यावसर एव नोदेति ।

प्रथमः- एवं चेद् भक्तेर्महत्वं लोकातिशायि स्यात् ।

द्वितीयः- साधु तर्कितं सख्या । अस्त्येव लोकोत्तरं भक्तेर्महत्त्वम् । तद् रामचरितमाध्यमेन लोके प्रसारयितुम् अस्मदाचार्या दृढसङ्कल्पाः सन्ति ।

प्रथमः- रामायणमेतद् आचार्या अस्मानपि कथयिष्यन्ति किमु ?

द्वितीयः- कथं न कथयिष्यन्ति ! लोकस्य सार्वत्रिकोपकाराय लिखितं रामायणम् आचार्या अवश्यमस्मान् उपदेक्ष्यन्ति ।

(नेपथ्ये)

- भो आश्रमवासिनो वटवस्तपस्विनश्च ! श्रूयताम् आचार्यः प्राचेतसोऽधुनैव पूर्णतां नीतस्य रामायणस्य सारं श्रावयितुं भवत आह्वयति । सत्वरमागम्यताम् ।

वटुद्वयम् (आकर्ण्य) अहो भाग्यम्, अहो भाग्यम् । साधयामस्तावद् आचार्यपार्श्वं रामायणसारश्रवणाय ।

(इति निष्क्रान्तौ)

(इति निष्क्रान्ताः सर्वे)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तमोऽङ्कः

प्रथमं दृश्यम्

(वाल्मीकेराश्रमः, मध्याह्णकालः)

वाल्मीकिः- उपरि काष्ठपीठिकायाम्, शतशोऽन्तेवासिनः कतिचन ऋषयश्च पीठादधोभागे सन्ति

वाल्मीकिः- भो अन्तेवासिनः ! मान्या ऋषयश्च ! भगवत्कृपया अस्मद्गुरोः प्रेरणया च मयाधुनैव रामायणं विलिखितम्। एतद् रामायणम् उत्तमचरितशिक्षणाय उपस्थापितम्। अत्र भिन्नभिन्नानां व्यक्तीनां भिन्नभिन्नानि कर्तव्यान्युल्लिखितानि सन्ति।

अन्तेवासिनः- कुलपतयः ! अत्र भवद्भिः कस्मै कस्मै कीदृशाः कीदृशाश्च आदर्शव्यवहारा उल्लिखिताः सन्ति ?

वाल्मीकिः- श्रूयताम्, पुत्रेण कथं पितृसेवा विधातव्या, पित्रा च पुत्रं प्रति कथं व्यवहर्तव्यम्, पत्या पत्नी कथं व्यवहर्तव्या, पत्न्या च पतिः कथं व्यवहर्तव्यश्चेति विषयाः काव्येऽस्मिन् प्रतिपादिताः सन्ति। अपि बुद्धं वत्सैः !

अन्तेवासिनः- बुद्धमाचार्य ! अन्येषामपि कर्तव्यानि महाकाव्ये प्रतिपादितानि भवेयुः ?

वाल्मीकिः- सन्ति। यथा राजप्रजयोः कीदृशमुत्तमं कर्तव्यमिति सम्यग् प्रदर्शितमस्ति। प्रजासुखे राजसुखम्, प्रजाहिते राजहितं भवति। नास्ति राज्ञः पृथक् सुखं, प्रजासुखं विहायेति दृष्टान्तादिभिः सम्यक् प्रतिपादितं वर्तते।

अन्तेवासिनः- भो आचार्य ! महाकाव्ये अन्तर्निहितानां विषयाणां प्रचारणात् सर्वे आचारवन्तो भविष्यन्तीति विचारयामः।

वाल्मीकिः- नैतन्मात्रम्, अत्र सूर्यवंश्यानां राज्ञां राजर्षीणाञ्च लोकोत्थानप्रधानस्य विशिष्टचरितस्य, लोककल्याणाय महर्षिभिर्विहितस्य तपोऽनुष्ठानस्य, आर्यावर्तीयभूगोलस्य, रामभरतयोरनुपमभ्रातृप्रेम्णः, रामलक्ष्मणयोः कर्तव्यनिष्ठायाः, जगज्जनन्याः सीताया महत्पातिव्रतस्य, गुरुशिष्ययोः सौहार्दसम्बन्धस्य, गुरुकुलीयाचाराणाञ्च वर्णनममुपस्थापितं वर्तते।

अन्तेवासिनः- भो आचार्य ! वयमेतद् रामायणं भवन्मुखारविन्दात् श्रोतुमभिलषामः। तदनु प्रतिग्रामं गत्वा मर्यादापथे सर्वतोभावेन लोकमग्रे वर्धयितुञ्च प्रयतिष्यामहे।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिः- वत्साः ! युष्माभिरुत्तमविचारः प्रकटितः । अहं सन्तुष्टोऽस्मि । रामायणस्य सम्बन्धे सूक्ष्मं दिग्दर्शनं सम्प्रति प्रकटितम् । समग्रं-रामायणं नियतसमये यूयं श्रोतुं पठितुञ्च प्राप्स्यथ ।

अन्तेवासिनः- अनुग्रहिताः स्म आचार्य !

वाल्मीकिः- अधुना यूयम् अधीतपाठान् पुनरावर्तयत, अवशिष्टानि आश्रमकार्याणि च सम्पादयत ।

अन्तेवासिनः- आचार्य ! वयं स्वव्यापारानुष्ठानाय साधयामः ।

(आचार्यं प्रणम्य निर्गच्छन्ति)

(इति निष्क्रान्ताः)

द्वितीयं दृश्यम्

(पर्णशालाया अभ्यन्तरे)

वाल्मीकिः- (स्वगतम्) भगवतो राघवेन्द्रस्य आविर्भावो भविष्यतीति विचारयामि । असौ नेदीयसि अवधावेव प्रकटीभूय धरामिमां सन्तोषयिष्यति । तदा अक्ष्णा समाधिना च प्रत्यक्षमेव रामलीलां विलोकयामि । तारकब्राह्मणः श्रीरामस्य लीला मुनिनामपि मोहकारिणी वर्तते । तथा हि -

पित्रोः पार्श्वे चपलगतितो बाल्ययामो व्यतीतो
यातः शिक्षाधरणविषये शिष्टकैशोरयामः ।
स्वे कर्तव्ये चलतु नितरां लोक एवं विचार्य
देवैर्वन्द्यो रघुपतिरसौ ग्राम्यलीलां व्यतानीत् ॥

कैशोरेऽसौ मुनिवरमहायज्ञरक्षार्थमेत्य
हत्वा दुष्टान् किल सुररिपून् यज्ञभूमिं ररक्ष ।
यात्रामध्ये पथि मुनिवधूं शापमुक्तां विधाय
शैवं चापं नरपतिसमाजे सलीलं बभञ्ज ॥

तुष्टोऽत्यर्थं जनकनृपतिर्मन्त्रिवृन्दश्च तुष्टो
तुष्टा सीता जनकतनया पौरवर्गश्च तुष्टः ।
तुष्टो रामः किल नववधूं प्राप्य सीतां सुशीलां
को वा तुष्टो न भवति जनः प्राप्य पत्नीं सुशीलाम् ॥

राज्याभिषेचनक्रमः कैकेय्या विघ्नितोऽभवत् ।
हननं शुभकार्याणां दुष्टानां प्रकृतिर्मता ॥

वनं ययौ दाशरथिः पूरणार्थं पितुर्वचः ।
स्ववचः पालयन्त्येव सर्वदैव मनीषिणः ॥
पितुर्वचनरक्षार्थं ययौ दाशरथिर्वनम् ।
नैजं वचः पूरयन्ति सर्वदैव मनीषिणः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वने युद्धाय सम्प्राप्ता राक्षसा बहवो हताः ।
देवमानवशत्रूणां हननं धर्म उच्यते ॥
रक्षसाऽपहृता सीता दण्डकारण्यभागतः ।
शुभकार्याणि किं कुर्यू राक्षसा दुष्टबुद्धयः ॥
शवर्यैर्ये दर्शनं दत्तं सुग्रीवो मित्रताङ्गतः ।
सज्जनाः सज्जनैस्साकं जायन्ते मेलनोत्सुकाः ॥
बाली हतः स्वदोषेण बद्धः सेतुश्च सागरे ।
किं वा स्याद् दुष्करं कार्यं शूरवीरमनस्विनाम् ॥
लङ्कायामभवत् युद्धं वीराणां रोमहर्षकः ।
भवत्येव हि सङ्गामः सततं रोमहर्षकः ॥
रावणः कुम्भकर्णश्च मेघनादादयो हताः ।
अवश्यं प्राप्नुवन्त्येव दुष्टा दोषस्य दण्डनम् ॥
विभीषणः शरणगो लङ्काराज्यमवाप्तवान् ।
मुक्तिं लभन्ते रामस्य भक्ताः राज्यस्य का कथा ! ॥
अग्नौ परीक्षिता सीता लोकप्रत्ययहेतवे ।
लोकापवादाद् दुर्लङ्घ्यात् भयं कस्य न जायते ॥
वानरर्क्षैः समं रामो स्वं राज्यं प्रविवेश ह ।
कार्ये समाप्ते गेहं हि भवेद् विश्राममन्दिरम् ॥
राज्याभिषेकः सम्भूतो राधवेन्द्रस्य धीमतः ।
राज्यं ज्येष्ठेन लब्धव्यमित्येवास्तेऽनुशासनम् ॥
मातृभ्रातृसुहृत्पौराः सन्तुष्टा अभवन् किल ।
असन्तुष्टः को नु भवेद् रामे राज्यं प्रशासति ॥
एवमन्यञ्च रामस्य कार्यं मधुरतावहम् ।
किं वा धीरैः कृतं कर्म न स्यान्मधुरतावहम् ॥

(नभो विलोक्य) रविरस्तं गच्छन् प्रतिभाति । तथा हि-

भ्रमित्वा लतादौ फलादीञ्च भुक्त्वा
स्वनीडे समायान्ति शीघ्रं पतङ्गाः ।
रविः सान्त्वनार्थं ययौ किन्नु सन्ध्या-
मितीवेह मन्दायते किं स्वरश्मीन् ॥
भवतु सन्ध्याचरणाय यामि । (इति निष्क्रान्तः)

(इति निष्क्रान्ताः सर्वे)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

(मुनीनामाश्रमाः । गोधूलिकालः)

(सम्बद्धानामृषीणामाश्रमा दृश्यन्ते । वाल्मीकिना प्रणीतं रामायणमहाकाव्यं समाधेर्दृष्टवन्तो बह्मर्षयः प्रमोदमग्ना दृश्यन्ते)

वसिष्ठः- (समाधेर्निवृत्तो भूत्वा सानन्दम्) भो अरुन्धति ! शृणु, मयाधुना समाधौ परमाश्चममनुभूतम् ! महर्षिणा वाल्मीकिना रामचरितं लोकेऽवतारितम् । समाधौ मयैतदनुभूतम् । पारिवारिकमर्यादाया आरभ्य राज्यपालनमर्यादापर्यन्तमत्र प्रकाशितमस्ति । रामचरितस्य सारोऽप्ययमेव । चिरञ्जीव्याद् महर्षिः ।

अरुन्धती- महर्षिः स्वस्तिमान् भूयात् ।

विश्वामित्रः- (समाधावेव सस्मितम्) भो महर्षे ! धन्योऽसि । साक्षाद् नारायणो भगवान् धराधामनि अवतरन्नस्तीति विभावयामि । अस्य चरितमवतरणात् प्रागेव त्वया दिव्यदृष्ट्या विलोक्य लिखितम् । सम्यगाचरितं त्वया ।

अगस्त्यः- (समाधेः स्थितावेव हृष्टवदनः) भो अन्तेवासिनः शृणुत, महर्षिणा वाल्मीकिना रामगाथा गीता । भो वाल्मीके ! धन्यो भवान् ! मम आराध्यदेवस्य श्रीरामस्य यशो गीतं भवता । भवान् जीविष्यत्यनेन सुकर्मणा यशःशरीरेण ।

अन्तेवासिनः- भो मुनिवर ! रामगाथां श्रोतुं वयं सातिशयमुत्काः स्मः ।

अगस्त्यः- भो अन्तेवाशिनो भवद्भिरवश्यमेव पश्चात् श्रोतुं प्राप्स्यते ।

अन्तेवासिनः- अनुगृहीताः स्मः ।

अत्रिः- (ध्यानाद् निवृत्य) अनसूये ! सुमधुरं दृश्यं दृष्टम् । अनादिनिधनो नारायणो लोकाय मर्यादां शिक्षयितुं धराधामनि महालक्ष्म्या सह अवर्तीयमाणो वर्तते । रामनाम्नश्चास्य तारकब्रह्मणश्चरितं वाल्मीकिमुनिना पूर्वमेव उट्टङ्कितम् । (अत्रान्तरे रामायणरचनार्माकर्ण्य आनन्दमग्ना देवाः वाल्मीकेराश्रमे पुष्पाणि वर्षयन्ति । अनेन दृश्येन अत्रिरधिकं मोमुद्यते ।) आदिकवये महर्षये शतशः प्रणामञ्जलयः सन्तु । अस्य यशो गातुं कः प्रभवति । तथा हि -

लोकः सुखी भवति केन विचार्य चेत्थं
प्राचेतसो व्यरचयद् रघुनाथवृत्तम् ।
लोकं प्रशिक्षयति शिष्टचरित्रमेतत्
किं वा मिलेदिह परत्र न शिष्टवृत्तात् ॥

(इति सर्वे निष्क्रान्ताः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(देवर्षिर्नारदो रामचरितं गायन् वाल्मीकिं प्रशंसन् तदाश्रममुपतिष्ठति)

नारदः- चौरोऽपि दस्युरपि दुष्कृतकं विहाय
रामं भजेद् यदि स भक्तिजलं समर्प्य ।
सम्मुच्यते रघुपतेश्चरितस्य गातु-
र्मातुं यशः परिधिमत्र प्रभुर्भवेत् कः ॥

वाल्मीकिः- नमो गुरुवरेभ्यः, (पादयोः प्रणमति)

नारदः- (शिरः स्पृशन्) यशस्वी भव ब्रह्मर्षे ! रामचरितं प्रकाश्य भवता लोकोऽयमुपकृतः ।

वाल्मीकिः- भगवन् ! अनेन केवलं गुरुवराणामादेशः पालितः ।

देवर्षिः- रामस्य मर्यादितमाचरणं पुरस्कृत्य लोको व्यवहरत्विति कामये ।

वाल्मीकिः- भवत्कृपया नितरामनुगृहीता वयम् ।

देवर्षिः- अतः परमपि वः किं प्रियं कारवाणि ?

वाल्मीकिः- भगवन् ! सर्वं प्रपूरितम्, तथापि भवान् प्रियं चिकीर्षति चेदेतदस्तु ।

भरतवाक्यम्- राष्ट्रं राजा न्यायपूर्णः सुरक्षेद्
दस्युश्चौरः कोऽपि राज्ये न तिष्ठेत् ।
ग्राम्याः पौराः शं लभेरन् चिराय
सर्वं कार्यं स्यात् समेषां हिताय ॥

(इति निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः ॥

समाप्तमिदं नाटकम्

•••

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9491-6-3
9 789937 949163